आजकल जो जनपदोद्ध्वंसकारी विषूचिका सर्वत्र भारतवासियों को कवलित कर रही है वह इस विषूचिका से भिन्न है। यह अजीर्ण से उत्पन्न होती है तथा उतनी संहारकारिणी नहीं होती पर इस नये विषूचिका के उत्पन्न होने में अजीर्ण की जरूरत नहीं होती। यद्यपि कभी कभी यह अजीर्णजनित विषूचिका भी सांघातिक विषूचिका में बदल जाया करती है। यह नयी विषूचिका आगन्तुज विषूचिका है जो भोजन–पान द्वारा शरीर के अन्दर एक प्रकार के खास जीवाणु (Comma basilli) के प्रवेश करने से होती है। इस जीवाणु के शरीर से उत्पन्न विष ही रोग का कारण है। इसमें वातोल्वण सन्निपात के अधिक लक्षण मिलते हैं। इसमें भी युगपत् भेद दस्त और वमन होते हैं। **भेद में** सड़े कुम्हड़े के जल सा मल तथा **वमन में** चावलों के धोवन का सा पानी निकलता है। एक दो वेग के बाद ही रोगी बलहीन, कोटरगत–चक्षु तथा अधोऽङ्ग में पीड़ा एवम् शिथिलतायुक्त हो जाता है। शरीर की गरमी घट जाती है एवम् अधिक शारीरिक उदकभाग के क्षय होने से जोर की प्यास होती है। शीघ्र ही हाथ-पैर ठंडे हो जाते हैं, अकड़ते हैं तथा नाड़ी भी मन्द हो जाती है। नेत्र, ओष्ठ, दन्त, नख आदि नीले हो जाते हैं। मूत्ररोध हो जाता है तथा बेहोशी होकर पञ्चत्व की प्राप्ति हो जाती है।

विषूचीलक्षणमाह––**मूर्च्छाऽतिसारो वमथुः पिपासा शूलभ्रमोद्वेष्टनजृम्भदाहाः।**
वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः॥

उपद्रवाः––**निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता।**
अमी उपद्रवाः ख्याता विषूच्याः पञ्च दारुणाः॥

विषूच्यलसकयोरसाध्यलक्षणम्––**यः श्यावदन्तोष्ठनखोऽल्पसंज्ञो वम्यर्दितोऽभ्यन्तरयातनेत्रः।**
क्षामस्वरः सर्वविमुक्तसन्धिर्यायान्नरः सोऽपुनरागमाय॥

१) दण्डालसकमाह–**तिर्यग्गतास्तनुं दोषा दण्डवत् स्तम्भयन्ति ये।**
स दण्डालसकस्त्याज्यः शीघ्रं देहविनाशकृत्॥

२) विलम्बिकामाह–**दुष्टं तु भुक्तं कफमारुताभ्यां प्रवर्त्तते नोर्ध्वमधश्च यस्याम्।**
बिलम्बिकां तां भृशदुश्चिकित्स्यामाचक्षते शास्त्रविदः पुराणाः॥

इसका उपक्रम (चिकित्सा) शीघ्र ही एवम् तत्परता से करना चाहिये। यह प्रायः प्र... या रात्रि के शेष भाग में आक्रमण करती है। शेषरात्रि का आक्रमण सांघातिकतम है... मूत्ररोध भी इसके असाध्य-लक्षणों में प्रधान है ॥ ११ ॥

अर्शश्चर्मकीलयोर्भेदाः—**अर्शांसि षड्विधान्याहुर्वातपित्तकफास्त्रतः।**
सन्निपाताच्च संसर्गात्तेषां भेदो द्विधा स्मृतः ॥१२॥

अर्श (१)याने बवासीर रोग छः प्रकार का होता है। वातज अर्श, पित्तज अर्श,

---

(१) अर्शसां सम्प्राप्तिपूर्वकं रूपम्—

दोषास्त्वङ्मांसमेदांसि सन्दूष्य विविधाकृतीन्।
मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि ताञ्जगुः॥

अर्शःशब्दप्रयोगस्य कारणम्— **अरिवत्प्राणिनो मांसकीलने निविशन्ति यत्।**
अर्शांसि तस्मादुच्यन्ते गुदमार्गनिरोधतः ॥

वातिकस्य निदानमाह—

कषायकटुतिक्तानि रूक्षशीतलघूनि यः। प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसेवनं... लङ्घनं देशकालौ च शीतौ व्यायामकर्म च। शोको वातातपस्पर्शौ हेतुर्वातार्शसां...

वातिकस्य लक्षणम्—**गुदाङ्कुरा बह्वनिलाः शुष्काश्चिमचिमान्विताः।**
म्लानाः श्यावारुणाः स्तब्धा विशदाः परुषाः खराः॥
मिथोविसदृशा वक्रास्तीक्ष्णा विस्फुटिताननाः।
बिम्बीखर्जूरकर्कन्धुकार्पासीफलसन्निभाः ॥
केचित्कदम्बपुष्पाभाः केचित्सिद्धार्थकोपमाः।
शिरःपार्श्वांसकट्यूरुवङ्क्षणाभ्यधिकव्यथाः ॥

क्षवथूद्गारविष्टम्भहृद्ग्रहारोचकप्रदाः। कासश्वासाग्निवैषम्यकर्णनादभ्रमाव... तैरार्त्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकम्। रुक्फेनपिच्छानुगतं विबद्धमुपवे... कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते। गुल्मप्लीहोदराष्ठीलासम्भवस्तत ए...

पैत्तिकनिदानम्—**कट्वम्ललवणोष्णानि व्यायामाग्न्यातपप्रभाः।**
देशकालावशिशिरौ क्रोधो मद्यमसूयनम् ॥
विदाहि तीक्ष्णमुष्णं च सर्वं पानान्नभेषजम्।
पित्तोल्वणानां विज्ञेयः प्रकोपे हेतुरर्शसाम् ॥

पैत्तिकलक्षणम्—**पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः।**
तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः ॥
शुकजिह्वायकृत्खण्डजलौकावक्त्रसन्निभाः।
दाहपाकज्वरस्वेदतृण्मूर्च्छाऽरुचिमोहदाः ॥

सोष्माणो द्रवनीलोष्णपीतरक्तामवर्चसः। यवमध्या हरित्पीतहारिद्रत्वङ्नखा...

र्श, रक्तज अर्श, सन्निपातज अर्श तथा द्विदोषज अर्श इनके दो भेद **सहज** याने जन्मके साथ उत्पन्न और **जन्मोत्तर उत्पन्न** तथा **सूखे** और **आर्द्र**।

विमर्श—कई वंशों में पुश्तैनी स्वरूप यह बीमारी चली आती है। गर्भाधानमें यदि गर्भारम्भक बीज का गुदा बनने का भाग दूषित रहता है, तो गर्भ से ही बालक बवासीर-युक्त होकर पैदा होता है। इसे ही **सहजार्श** कहते हैं। जो बीजदोष से होता है। **जन्मोत्तर** होने

कफजनिदानम्—**मधुरस्निग्धशीतानि लवणाम्लगुरूणि च ।**
अव्यायामो दिवास्वप्नः शय्याऽऽसनसुखे रतिः ॥
प्राग्वातसेवाशीतौ च देशकालावचिन्तनम् । श्लैष्मिकाणां समुद्दिष्टमेतत्कारणमर्शसाम् ॥

कफजलक्षणम्—**श्लेष्मोल्वणा महामूला घना मन्दरुजः सिताः ।**
उत्सन्नोपचिताः स्निग्धाः स्तब्धा वृत्तगुरुस्थिराः ।
पिच्छिलाः स्तिमिताः श्लक्ष्णाः कण्ड्वाढ्याः स्पर्शनप्रियाः ।
करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः ।
वङ्क्षणानाहिनः पायुबस्तिनाभ्यवकर्षिणः । सकासश्वासहृल्लासप्रसेकारुचिपीनसाः ॥
मेहकृच्छ्रशिरोजाड्यशिशिरज्वरकारिणः। क्लैब्याग्निमार्दवच्छर्दिरामप्रायविकारदाः॥
वसाभसकफप्रायपुरीषाः सप्रवाहिकाः। न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः ॥

द्वन्द्वसन्निपातजयोर्निदाने— **हेतुलक्षणसंसर्गाद्विद्याद्द्वन्द्वोल्वणानि च ।**
सर्वो हेतुस्त्रिदोषाणां सहजैर्लक्षणैः समम् ॥

द्वन्द्वसन्निपातजयोर्लक्षणे— **संसर्गलिङ्गः संसर्गाद्भवन्ति हि द्विदोषजाः ।**
सर्वैः सर्वात्मकान्याहुर्लक्षणैः सहजानि च ॥

रक्तार्शोलक्षणम्—**रक्तोल्वणा गुदे कीलाः पित्ताकृतिसमन्विताः ।**
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ॥
तेऽत्यर्थं दुष्टमुष्णं च गाढविट्कप्रपीडिताः। स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ॥
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः। हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः॥
विट्श्यावं कठिनं रूक्षमधोवायुर्न गच्छति ।

रक्तार्शसो वातकफानुबन्धभेदेन लक्षणम्—**तनु चारुणवर्णं च फेनिलं चासृगर्शसाम् ।**
कट्यूरुगुदशूलं च दौर्बल्यं यदि चाधिकम् ॥
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम् । शिथिलं श्वेतपीतं च विट्स्निग्धं गुरु शीतलम्॥
यद्यर्शसां घनं चासृक् तन्तुमत्पाण्डु पिच्छिलम् ॥
गुदं सपिच्छं स्तिमितं गुरु स्निग्धं च कारणम् ।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः ॥

मेढ्रादीनामर्शसां लक्षणम्—**मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नाभिजानि तु ।**
गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च ॥

वाला मिथ्याऽऽहार-विहार से उत्पन्न होता है। **वातार्श**-शुष्क तथा **रक्तार्श**—आर्द्र है। यह गुदा की बलियों पर ही होता है। नासा, नाभि तथा लिङ्ग में भी होना पाया जाता है।

सहजोत्तरजन्मभ्यां तथा शुष्कार्द्रभेदतः ।
त्रिधैव चर्मकीलानि वातात्पित्तात्कफादपि ॥ १३ ॥

अर्श का दूसरा भेद जो शरीर के बाहर चमड़े पर होता है, उसे (१)**चर्मकील** कहते हैं। वह भी वातादिभेद से तीन तरह का होता है। यह चमड़े पर कड़ा, खर तथा केंचुवे के मुख के रूप का होता है ॥ १३ ॥

कृमिभेदाः—**एकविंशतिभेदेन कृमयः स्युर्द्विधा च ते ।**
बाह्यास्तथाऽऽभ्यन्तराः स्युस्तेषु यूका बहिश्चराः ॥ १४॥

लिक्षाश्चान्येऽन्तरचराः कफात्ते हृदयोदकाः। अन्त्रादा उदरावेष्टाश्चुरवश्च महागुदाः। सुगन्धा दर्भकुसुमास्तथा रक्ताच्च मातरः। सौरसा लोमविध्वंसा रोमद्वीपा उदुम्बराः। केशादाश्च तथैवान्ये शकृज्जाता मकेरुकाः। लेलिहाश्च सशूलाश्च सौसुरादाः ककेरुकाः। तथाऽन्यः कफरक्ताभ्यां संजातः स्नायुकः स्मृतः।व्रणस्य कृमयश्चान्ये विषमा बाह्य...

इसी तरह से (२)**कृमिरोग** भी कृमिभेद से २० प्रकार का होता है। ये क्रिमि दो प्रकार के होते हैं--**शरीर के बाहर होने वाले** तथा **अन्दर होने वाले**। उनमें से बाहर होने **वाले** यूका (जूँ) तथा लिक्षा (लीख) भेद से दो प्रकार के होते हैं। बाकी शरीर के अन्दर

---

(१) चर्मकीलसम्प्राप्तिः—**व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः।**
कीलोपमं स्थिरखरं चर्मकीलं तु तं विदुः ॥

चर्मकीलस्य वातादिभेदेन लक्षणम्— **वातेन तोदपारुष्यं पित्तादसितरक्तता ।**
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता ॥

(२) कृमीणां कारणम्—**अजीर्णभोजी मधुराम्लनित्यो द्रवप्रियः पिष्टगुडोपभोक्ता।**
व्यायामवर्जी च दिवाशयानो विरुद्धभुक् संलभते कृमींस्तु॥

बाह्यकृमीणां द्वैविध्यं लक्षणं कार्यञ्चाह— **तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ।**
बहुपादाश्च सूक्ष्माश्च १यूका २लिक्षाश्च नामतः ।
द्विधा ते कोठपिडकाकण्डूगण्डान्प्रकुर्वते ।

कफजन्यकृमिविशेषाणां निदानं लक्षणं संख्या नामानि कर्माणि च—

मांसमत्स्यगुडक्षीरदधिशुक्तैः कफोद्भवाः ।
कफादामाशये जाता वृद्धाः सर्पन्ति सर्वतः ।।
पृथुब्रध्ननिभाः के चित् के चिद् गण्डूपदोपमाः ।
रूढधान्याङ्कुराकारास्तनुदीर्घास्तथाऽणवः ॥
श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते ।
३अन्त्रादा ४उदरावेष्टा ५हृदयादा ६महागुदाः ॥

होते हैं। उनमें से **कफ से उत्पन्न** कृमि हृदयाद, अन्त्राद, उदरावेष्ट, चुरु, महागुद, सुगन्ध और दर्भकुसुम, ये सात प्रकार के हैं। **रक्त से उत्पन्न** कृमि, मातृ, सौरस, लोमविध्वंस, रोमद्वीप उदुम्बर और केशाद ये छः प्रकार के होते हैं तथा **पुरीष याने मल में उत्पन्न होने वाले** कृमि मकेरुक, लेलिह, सशूल ग्रन्थान्तर में (सलून), सौसुराद और ककेरुक ये पांच प्रकार के होते हैं। इनसे भिन्न एक और कृमि **कफरक्त से** पेशियों के अन्दर उत्पन्न होता है, उसे '**स्नायुक**' कहते हैं तथा दूसरे भी कृमि जो **व्रण पर उत्पन्न होते हैं** वे भी बाहरी उत्पत्ति वाले होते हैं। इस तरह आचार्य ने २२ भेद गिनाये हैं।

विमर्श—इनमें से **कफोत्पन्न कृमि** आमाशय में, **पुरीषोत्पन्न कृमि** मलाशय में,

---

७चुरवो ८दर्भकुसुमाः ९सुगन्धास्ते च कुर्वते ।
हृल्लासमास्यस्रवणमविपाकमरोचकम् ।
मूर्च्छाच्छर्दिज्वरानाहकार्श्यक्षवथुपीनसान् ॥

रक्तजक्रिमिविशेषाणां निदानं लक्षणं संख्या नामानि कर्माणि च—

विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि ।
रक्तवाहिशिरास्थानाद्रक्तजा जन्तवोऽणवः ॥
अपादा वृत्तताम्राश्च सौक्ष्म्यात्के चिददर्शनाः ।
१०केशादा ११लोमविध्वंसा १२रोमद्वीपा १३उदुम्बराः ॥
षट् ते कुष्ठैककर्माणः सह१४सौरस१५मातरः ।

पुरीषजन्यक्रिमिविशेषाणां निदानं लक्षणं संख्या नामानि कर्माणि च—

माषपिष्टाम्ललवणगुडशाकैः पुरीषजाः । पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः ।
प्रवृद्धाः स्युर्भवेयुश्च ते यदाऽऽमाशयोन्मुखाः ॥
तदाऽस्योद्गारनिःश्वासा विड्गन्धानुविधायिनः ।
पृथुवृत्ततनुस्थूलाः श्यावपीतासितासिताः ।
ते पञ्च नाम्ना कृमयः १६ककेरुक१७मकेरुकाः ॥
१८सौसुरादाः १९सशूलाख्या २०लेलिहा जनयन्ति हि ।
विड्भेदशूलविष्टम्भकार्श्यपारुष्यपाण्डुताः ॥
रोमहर्षाग्निसदनं गुदकण्डूर्विमार्गगाः ॥

स्नायुकमाह—अन्यः स्नायुकसंज्ञः क्रिमिरेव स तु कफरक्ताभ्यां संजातः । अयमपि कफजेषु सप्तसु कृमिषु ये दीर्घास्तेषां भेद एव, अत एव "कफरक्ताभ्यां जायत" इत्युक्तम् ।

व्रणक्रिमिकारणम्—असावधानतया व्रणे कृमिसमुत्पत्तिः ।

अन्तःसंजातकृमिलक्षणम्—ज्वरो विवर्णता शूलं हृद्रोगः सदनं भ्रमः ।
भक्तद्वेषोऽतिसारश्च सञ्जातक्रिमिलक्षणम् ॥

रक्तज कृमि रक्तवाही शिराओं में, **स्नायुक** मांसपेशी के अन्दर तथा **व्रणकृमि** व्रणों में हैं। **आयुर्वेदीय मत से** अन्तःकृमि शरीर के अन्दर ही पैदा होते हैं। पर **पाश्चात्य** इन्हें भी अण्डावस्था में खानपान के साथ शरीर के अन्दर प्रवेश होना बताते हैं। आज रोगों के जीवाणुओं का आविष्कार हुआ है, वे कृमियों में नहीं गिने जाते हैं॥ १४-१

पाण्डुरोगकामलयोर्भेदाः–**पाण्डुरोगाश्च पञ्च स्युर्वातपित्तकफैस्त्रिधा।**
त्रिदोषैर्मृत्तिकाभिश्च तथैका कामला स्मृता।
स्यात्कुम्भकामला चैका तथैकं च हलीमकम्॥ १९॥

(१)**पाण्डुरोग** या पीलिया पांच तरह का होता है—१-वातज, २-पित्तज,

---

(१) पाण्डुरोगस्य विप्रकृष्टनिदानपूर्विका सम्प्राप्तिः—

व्यवायमम्लं लवणानि मद्यं मृदं दिवास्वप्नमतीव तीक्ष्णम्।
निषेव्यमाणस्य प्रदूष्य रक्तं कुर्वन्ति दोषास्त्वचि पाण्डुभावम्॥

१—वातिकमाह—

त्वङ्मूत्रनयनादीनां रूक्षकृष्णारुणाभता। वातपाण्ड्वामये तोदकम्पानाहभ्रमा

२–पैत्तिकमाह—**पीतत्वङ्नखविण्मूत्रो दाहतृष्णाज्वरान्वितः।**
भिन्नविट्कोऽतिपीताभः पित्तपाण्ड्वामयी नरः॥

३–श्लैष्मिकमाह—**कफप्रसेकश्वयथुतन्द्राऽऽलस्यातिगौरवैः।**
पाण्डुरोगी कफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः॥

४–सान्निपातिकमाह—**ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः।**
पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः॥

५–मृज्जस्य सम्प्राप्तिः—**मृत्तिकाऽदनशीलस्य कुप्यत्यन्यतमो मलः।**
कषाया मारुतं पित्तमूषरा मधुरा कफम्॥

कोपयेन्मृद्रसादींश्च रौक्ष्याद् भुक्तञ्च रूक्षयेत्। पूरयत्यविपक्वैव स्रोतांसि निरु
इन्द्रियाणां बलं हत्वा तेजो वीर्य्यौजसी तथा। पाण्डुरोगं करोत्याशु बलवर्णाग्नि

लक्षणम्—**मृद्भक्षणाद् भवेत् पाण्डुस्तन्द्राऽऽलस्यनिपीडितः।**
स कासश्वासशूलार्त्तो दाहारुचिसमन्वितः॥
शूनाक्षिकूटगण्डभ्रूः शूनपान्नाभिमेहनः।
क्रिमिकोष्ठोऽतिसार्य्येत मलं सासृक्कफान्वितम्॥

।कामलाकुम्भकामलयोर्निदानपूर्विका सम्प्राप्तिर्लक्षणञ्च—

पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते॥

हारिद्रनेत्रः स भृशं हारिद्रत्वङ्नखाननः। पीतरक्तशकृन्मूत्रो भेकवर्णो हतेन्द्रि
दाहाविपाकदौर्बल्यसदनारुचिकर्षितः। कामला बहुपित्तैषा कोष्ठशाखाऽऽश्रया
कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला॥

त्रिदोषज तथा ५ मिट्टी खाने से उत्पन्न। **कामला** एक ही होता है। **कुम्भ कामला** तथा **हलीमक** भी एक एक ही होता है।

विमर्श—अम्ल, कटु आदि अपथ्य से कुपित दोष रक्त को दूषित करके शरीर के रंग को पीला सा कर देते हैं। उसे **पाण्डुरोग** कहते हैं। इसी पाण्डुरोग में ही अधिक पित्तकारक अपथ्य-सेवन करने से पित्त अतिवृद्ध होकर रक्त एवम् मांस को विदग्ध करके **कामला** रोग उपस्थित करता है। यही कामला अधिक दिन होने से खर होकर **कुम्भकामला** हो जाती है। तथा यदि पाण्डुरोगी हरा, श्याव एवम् पीला सा रङ्ग का या पक्वपत्र का सा रङ्ग का हो जाता है तो उसे **हलीमक रोग** कहते हैं। इस तरह ये सब पाण्डुरोग के ही अवस्थाभेद हैं, पर चिकित्साभेदार्थ इनका भी अलग पाठ किया जाता है॥ १९॥

रक्तपित्तभेदाः—**रक्तपित्तं त्रिधा प्रोक्तमूर्ध्वगं कफसंभवम्।**
अधोगं मारुतं ज्ञेयं तद्द्वयेन द्विमार्गगम्॥ २०॥

(१)**रक्तपित्त** तीन तरह का होता है—

हलीमकस्य लक्षणम्—

ा तु पाण्डोर्वर्णः स्याद्धरितश्यावपीतकः। बलोत्साहक्षयस्तन्द्रा मन्दाग्नित्वं मृदुज्वरः
ीष्वहर्षोऽङ्गमर्दश्च श्वासतृष्णाऽरुचिभ्रमाः।हलीमकं तदा तस्य विद्यादनिलपित्ततः॥

विशेषकारणमाह—**रोगाः पाण्ड्वादयो ज्ञेया यकृद्दोषसमुद्भवाः।**
यकृतः स्वस्थतां प्राप्ते शाम्यन्ति व्याधयश्च ते॥

(१) रक्तपित्तस्य नि- **घर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः।**
ानपूर्विका सम्प्राप्तिः—**तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च।**
पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम्।
ततः प्रवर्त्तते रक्तमूर्ध्वञ्चाधो द्विधाऽपि वा॥
आमाशयाद् व्रजेदूर्ध्वमधः पक्वाशयाद् व्रजेत्।
विदग्धयोर्द्वयोश्चापि द्विधा मार्गं प्रवर्त्तते॥
ूर्ध्वं नासाऽक्षिकर्णास्यैर्मेढ्योनिगुदैरधः। कुपितं रोमकूपैश्च समस्तैस्तत् प्रवर्त्तते।

स्य विशिष्टं रूपम्—**सान्द्रं सपाण्डु सस्नेहं पिच्छिलञ्च कफान्वितम्।**
श्यावारुणं सफेनञ्च तनु रूक्षञ्च वातिकम्॥
रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभम्॥
मेचकागारधूमाभमञ्जनाभञ्च पैत्तिकम्।
संसृष्टलिङ्गं संसर्गात् त्रिलिङ्गं सान्निपातिकम्।

र्गभेदेन मार्गभेदः—**ऊर्ध्वगं कफसंसृष्टमधोगं पवनानुगम्।**
द्विमार्गं कफवाताभ्यामुभाभ्यामनुवर्त्तते॥

क्तपित्तस्योपद्रवाः—**दौर्बल्यश्वासकासज्वरवमथुमदाः पाण्डुतादाहमूर्च्छा-**
भुक्ते घोरो विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीडा॥

१—**ऊर्ध्वमार्ग** याने नाक, आंख, मुख एवम् कर्ण प्रभृति से निकलने वाला र यह **कफदोष** से संसृष्ट रहता है।

२—**अधोमार्ग** याने लिङ्ग, योनि एवम् गुदा मार्ग से निकलने वाला **रक्तपि** **वातदोष** से संसृष्ट रहता है।

३—दोनों दोष **कफ** तथा **वात** से संसृष्ट एवम् ऊर्ध्व तथा **अधोमार्ग** से वाला **रक्तपित्त**।

विमर्श—चरक में **रक्तपित्त** की एक **रोमान्तिका** दशा भी कही गयी है कि शरीर के प्रत्येक रोमकूप से निकलता है। यह सिर्फ अवस्थान्तर ही है प्रकार-भेद नहीं कुपित होने से उपर्युक्त कोई भी रक्तपित्त इस दशा में उपस्थित हो सकता है। र **पित्त** ही प्रधान होता है **कफ** एवम् **वात** अनुबन्ध होते हैं ॥ २० ॥

कासभेदाः—**कासाः पञ्च समुद्दिष्टास्ते त्रयः स्युस्त्रिभिर्मलैः।**
उरःक्षताच्चतुर्थः स्यात्क्षयाद्धातोश्च पञ्चमः ॥ २१ ॥

कास(१) रोग पांच तरह का होता है उसमें तीन तो १–वात से, २–पित्त से,

---

तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनञ्च
भक्तद्वेषाविपाकौ विकृतिरपि भवेद्रक्तपित्तोपसर्गात् ॥

(१) कासस्य निदान-**धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेषणाच्च।**
सम्प्राप्तिपूर्वकं सामान्य **विमार्गगत्वाच्च हि भोजनस्य वेगावरोधात् क्षवथोस्तथैव**
लक्षणम्— **प्राणो ह्युदानानुगतः प्रदुष्टः सम्भिन्नकांस्यस्वनतुल्यघोषः**
निरेति वक्त्रात् सहसा स दोषो मनीषिभिः कास इति
वातिककासस्य लक्षणम्–**हृच्छङ्खपार्श्वोदरमूर्द्धशूली क्षामाननः क्षीणबलस्वरौजाः।**
प्रसक्तवेगस्तु समीरणेन भिन्नस्वरः कासति शुष्कमेव ॥
पैत्तिककासस्य लक्षणम्–**उरोविदाहज्वरवक्त्रशोषैरभ्यर्दितस्तिक्तमुखस्तृषाऽऽर्त्तः।**
पित्तेन पीतानि वमेत कटूनि कासेत् स पाण्डुः परिदह्य
श्लैष्मिककासस्य लक्ष-**प्रलिप्यमानेन मुखेन सीदन् शिरोरुजार्त्तः कफपूर्णदेहः।**
णम्— **अभक्तरुग्गौरवकण्डुयुक्तः कासेद् भृशं सान्द्रकफः कफेन**
क्षतजस्य कासस्य निदा-**अतिव्यवायभाराध्वयुद्धाश्वगजनिग्रहैः।**
नपूर्विका सम्प्राप्तिर्ल-**रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत् ॥**
क्षणञ्च— **स पूर्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम्।**
कण्ठेन रुजताऽत्यर्थं विभग्नेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना॥ दुःखस्पर्शेन शूलेन भेदपीडाऽभि
पर्वभेदज्वरश्वासतृष्णावैस्वर्यपीडितः। पारावत इवाकूजन् कासवेगात् क्षतो

ौर ४–उरःक्षत याने फेफड़े में घाव होने से तथा पांचवा ५ धातुक्षय से होता है।

विमर्श—जब मल **फुफ्फुस** में जमा होते हैं तो उनसे दूषित होकर प्राणवायु उदानवायु ा अनुगत होकर फूटी काँसी की सी आवाज के साथ गले से फेफड़े में स्थित दोष को लेकर ख–मार्ग से निकलता है यही **खांसी** चाहे किसी कारण से हो बिना फुफ्फुस दूषित हुए हीं होती तथा उसमें **श्लेष्मा** का अनुबन्ध रहता ही है ॥ २१ ॥

क्षयभेदाः—**क्षयाः पञ्चैव विज्ञेयास्त्रिभिर्दोषैस्त्रयश्च ते ।**
चतुर्थः सन्निपातेन पञ्चमः स्यादुरःक्षतात् ॥ २२ ॥

(१)**क्षय**रोग पाँच तरह का होता है। उसमें तीन दोषों से तीन प्रकार का १–वातजक्षय,

---

यजकासस्य निदान- **विषमासात्म्यभोज्यातिव्यवायाद् वेगनिग्रहात् ।**
पूर्विका सम्प्राप्तिर्ल- **घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः ॥**
क्षणञ्च— **कुपिताः क्षयजं कासं कुर्युर्देहक्षयप्रदम् ।**
दुर्गन्धं हरितं श्यावं प्रततं कफमस्यति ॥
थानादुत्कसमानश्च हृदयं मन्यते च्युतम् । अकस्मादुष्णशीतार्त्तो बह्वाशी दुर्बलः कृशः ॥
न्नग्धाच्छमुखवर्णत्वक् श्रीमद्दशनलोचनैः । पाणिपादतलैः शुक्लैः सततासूयको घृणी ॥
ज्वरो मिश्राकृतिस्तस्य पार्श्वे रुक् पीनसोऽरुचिः ।
स गात्रशूलज्वरदाहमोहान् प्राणक्षयञ्चोपलभेत कासी ।
शुष्यन् विनिष्ठीवति दुर्बलस्तु प्रक्षीणमांसो रुधिरं सपूयम् ॥
तं सर्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति ।
(१) क्षयशोषविवरणम्, तस्य विप्रकृष्टनिदानम्—
वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात् ।
त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ॥
यक्ष्म–राजयक्ष्म–क्षय–**वैद्यो व्याधिमता यस्माद् व्याधिर्यत्नेन यक्ष्यते ।**
षशब्दानां निरुक्तयः–**स यक्ष्मा प्रोच्यते लोके शब्दशास्त्रविशारदैः ॥**
ज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः । तस्मात्तं राजयक्ष्मेति प्रवदन्ति मनीषिणः ॥
क्रियाक्षयकरत्वात्तु क्षय इत्युच्यते बुधैः । संशोषणाद्रसादीनां शोष इत्यभिधीयते ॥
षसम्प्राप्तिः— **कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु ।**
तिव्यवायिनो वाऽपि क्षीणे रेतस्यनन्तराः । क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः ॥
रूपयक्ष्मणो लक्ष–**अंसपार्श्वाभितापश्च सन्तापः करपादयोः ।**
णम्— **ज्वरः सर्वाङ्गगश्चैव लक्षणं राजयक्ष्मणः ॥**
अन्यच्च—**त्रिभिर्वा पीडितं लिङ्गैर्ज्वरकासासृगामयैः ।**

२–पित्तज क्षय, ३–श्लेष्मज क्षय और संनिपात से चौथा सन्निपातज क्षय तथा उरःक्षत से होने वाला क्षय होता है ॥ २२ ॥

सुश्रुतोक्तानि षड् लक्षणानि—

भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनम्। स्वरभेदश्च जायेत षड्रूपे राज

अन्यच्च—**कासातिसारपार्श्वार्त्तिस्वरभेदारुचिज्वरैः।**

वातादिदोषभेदेन क्षय–**स्वरभेदोऽनिलाच्छूलं सङ्कोचश्चांसपार्श्वयोः।**

स्यैकादशरूपाणि— **ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः॥**

शिरसः परिपूर्णत्वमभक्तच्छन्द एव च। कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः क

एक एव मतः शोषः सन्निपातात्मको गदः। उद्रेकात्तत्र लिङ्गानि दोषाणां नि

निदानविशेषे शोषविशे-**व्यवायशोकवार्द्धक्य-व्यायामाध्वप्रशोषितान्।**

षविवरणम्— **व्रणोरःक्षतसंज्ञौ च शोषिणौ लक्षणः शृणु॥**

व्यवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः। पाण्डुदेहो यथापूर्वं क्षीयन्ते चास्य ध

प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः। विना शुक्रक्षयकृतैर्विकारैरुप

जराशोषी कृशो मन्दवीर्यबुद्धिबलेन्द्रियः। कम्पनोऽरुचिमान्भिन्नकांस्यपात्रह

ष्ठीवति श्लेष्मणा हीनं गौरवारुचिपीडितः। सम्प्रस्रुतास्यनासाक्षः शुष्करूक्ष

प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः। अध्वशोषी च स्रस्ताङ्गः सम्भृष्टपरुष

व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः। लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं वि

रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात्। व्रणिनश्च भवेच्छोषः स चासाध्यतमः

उरःक्षतस्य निदानम्—

धनुषाऽऽयस्यतोऽत्यर्थं भारमुद्वहतो गुरुम्। युद्ध्यमानस्य बलिभिः पततो वि

वृषं हयं वा धावन्तं दम्यं चान्यं निगृह्णतः। शिलाकाष्ठाश्मनिर्घातान्क्षिपतो निघ्न

अधीयानस्य वाऽत्युच्चैर्दूरं वा व्रजतो द्रुतम्॥

महानदीर्वा तरतो हयैर्वा सह धावतः। सहसोत्पततो दूरात्तूर्णं वाऽतिप्रनृत्य

तथाऽन्यैः कर्मभिः क्रूरैर्भृशमभ्याहतस्य च। ताडिते वक्षसि व्याधिर्बलवान् स

स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः। विक्षते वक्षसि व्याधिर्बलवान् स

उरःक्षतस्य लक्षणम्—

उरो विरुज्यतेऽत्यर्थं भिद्यतेऽथ विभज्यते। प्रपीड्यते ततः पार्श्वे शुष्यत्यङ्गं प्रवे

क्रमाद् वीर्य्यं बलं वर्णो रुचिरग्निश्च हीयते। ज्वरो व्यथा मनोदैन्यं विड्भेदोऽग्निव

दुष्टः श्यावः सुदुर्गन्धः पीतो विग्रथितो बहुः। कासमानस्य चाभीक्ष्णं कफः साख

सक्षतः क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात्। अव्यक्तं लक्षणं तस्य पूर्वरूपमिति

अन्यद् विशिष्टं लक्षणम्–**उरोरुक् शोणितच्छर्दिः कासो वैशेषिकः क्षते।**

क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहः॥

शोषभेदाः—**शोषाः स्युः षट्प्रकारेण स्त्रीप्रसङ्गाच्छुचो व्रणात्।**
अध्वश्रमाच्च व्यायामाद् वार्धक्यादपि जायते ॥ २३ ॥

शोष रोग छः प्रकार का होता है। १–स्त्रीसङ्ग अधिक करने से, २–अधिक शोक करनेसे, व्रण से, ४ अधिक रास्ता चलने से, ५ अधिक परिश्रम करने से तथा ६–बुढ़ापा से।

विमर्श—शोष और क्षय एवम् राजयक्ष्मा एक ही रोग है, सिर्फ अवस्थाभेद मात्र है। ोजन आदि के अभाव में यदि रसादि धातुओं का क्षय होता है तो शरीर सूखता है। इसे **ोष** या अनुलोम क्षय कहते हैं।

अतिरिक्त मैथुन आदि से अधिक शुक्रक्षय होने से पहले बल का अधिक क्षय होकर र अपरापर धातुओं का भी क्षय होता है। इसे **प्रतिलोमक्षय** या क्षय कहते हैं।

ये सब राजयक्ष्मा ही हैं। कई आचार्य धातुभेद से १८ प्रकार का क्षय मानते हैं, पर यहां ापभेद से कहने के कारण उससे कोई विरोध नहीं आता। यह एक महाभयंकर एवम् असाध्य ग है। इसकी चिकित्सा कितना भी बड़ा चिकित्सक हो प्रतिज्ञा करके कर नहीं सकता। ह **प्रथमावस्था** में यदि बल एवम् मांस का क्षय न हुआ हो तो साध्य हो सकता है। बुढ़ापा स्वभावतः ही शरीर की धातुएँ क्षीण होती हैं। इससे क्षय में यह भी गिना गया है ॥ २३ ॥

श्वासभेदाः—**श्वासाश्च पञ्च विज्ञेयाः क्षुद्रः स्यात्तमकस्तथा।**
ऊर्ध्वश्वासो महाश्वासश्छिन्नश्वासश्च पञ्चमः ॥ २४ ॥

(१)**श्वास** रोग पांच तरह का होता है १–क्षुद्रश्वास, २–तमक श्वास ३–ऊर्द्ध्वश्वास, –महाश्वास तथा ५–छिन्नश्वास।

विमर्श—यह **फुप्फुस** और **श्वासनली** का रोग है। स्वाभाविक श्वास–प्रश्वास में व्य-तिक्रम घटना ही श्वास रोग है ॥ २४ ॥

निदानविशेषे लक्षणवि-शेषः— **व्रणरोधात् क्षयाच्चैव कोष्ठात्प्रतिमलात्तथा।**
क्षतोरस्कस्यान्नपाके निःश्वासो वाति पूतिकः ॥

क्षतस्य साध्ययाप्या-साध्यलक्षणानि— **अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नवः।**
परिसंवत्सरो याप्यः सर्वलिङ्गन्तु बर्जयेत् ॥

यक्ष्मणोऽसाध्यता—**सर्वैरर्द्धैस्त्रिभिर्वाऽपि लिङ्गैर्मांसबलक्षये।**
युक्तो बर्ज्यश्चिकित्स्यस्तु सर्वरूपोऽप्यतोऽन्यथा ॥

(१) श्वाससम्प्राप्तिः–**यदा स्रोतांसि संरुद्ध्य मारुतः कफपूर्वकः।**
विष्वग् व्रजति संरुद्धस्तदा श्वासान्करोति सः ॥
श्लेष्मोपरुद्धगमनः पवनोऽतिदुष्टः सन्दूषयन्ननु जलान्नवहाश्च नाडीः।
आमाशयोद्भवमिदं विदधात्युरःस्थं, श्वासे च वक्रगमनो हि शरीरभाजाम् ॥

श्वासविप्रकृष्टनिदानम्—
विदाहिगुरुविष्टम्भिरूक्षाभिष्यन्दिभोजनैः। शीतपानाशनस्नानरजोधूमातपानिलैः।

हिक्काभेदाः—कथिताः पञ्च हिक्कास्तु तास्तु क्षुद्राऽन्नजा तथा।
गम्भीरा यमला चैव महती पञ्चमी तथा॥ २९॥

हिक्का या हिचकी भी पांच तरह की होती है। १–क्षुद्रा याने जो मन्दवेग

व्यायामकर्मभाराध्ववेगाघातापतर्पणैः। हिक्का श्वासश्च कासश्च नृणां समुप

१–महाश्वासस्य लक्षणम्—

उद्धूयमानवातो यः शब्दवद्दुःखितो नरः। उच्चैः श्वसिति संरुद्धो मत्तर्षभ इ
प्रणष्टज्ञानविज्ञानस्तथा विभ्रान्तलोचनः। विष्टब्धाक्ष्याननो बद्धमूत्रवर्चा वि
दीनः प्रश्वसितं चास्य दूराद्विज्ञायते भृशम्। महाश्वासोपसृष्टस्तु क्षिप्रमेव वि

२–ऊर्ध्वश्वासस्य लक्षणम्—

ऊर्ध्वं श्वसिति यो दीर्घं न च प्रत्याहरत्यधः। श्लेष्मावृतमुखस्रोताः क्रुद्धगन्ध
ऊर्ध्वदृष्टिर्विपश्यंश्च विभ्रान्ताक्ष इतस्ततः। प्रमुह्यन्वेदनाऽऽर्त्तश्च शुष्कास्योऽर

ऊर्ध्वश्वासस्यासाध्यता— ऊर्ध्वश्वासे प्रकुपिते ह्यधः श्वासो निरुद्ध्यते।
मुह्यतस्ताम्यतश्चोर्ध्वश्वासस्तस्यैव हन्त्यसून्॥

३–छिन्नश्वासस्य लक्षणम्—यस्तु श्वसिति विच्छिन्नं सर्वप्राणेन पीडितः।
न वा श्वसिति दुःखार्त्तो मर्मच्छेदरुगर्दितः॥
आनाहस्वेदमूर्च्छाऽऽर्त्तो दह्यमानेन बस्तिना।
विप्लुताक्षः परिक्षीणः श्वसन्रक्तैकलोचनः॥
विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः।
छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून्॥

४–तमकश्वासस्य लक्षणम्—

प्रतिलोमं यदा वायुः स्रोतांसि प्रतिपद्यते। ग्रीवां शिरश्च संगृह्य श्लेष्माणं समु
करोति पीनसं तेन रुद्धो घुर्घुरकं तथा। अतीव तीव्रवेगेन श्वासं प्राणप्रपीडकम्
प्रताम्यति स वेगेन त्रस्यते सन्निरुध्यते। प्रमोहं कासमानश्च स गच्छति मुहु
श्लेष्मणा मुच्यमानेन भृशं भवति दुःखितः। तस्यैव च विमोक्षान्ते मुहूर्त्तं लभते
तथाऽस्योद्ध्वंसते कण्ठः कृच्छ्राच्छक्नोति भाषितुम्॥
न चापि निद्रां लभते शयानः श्वासपीडितः॥
पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः।
आसीनो लभते सौख्यमुष्णं चवाभिनन्दति॥
उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमार्त्तिमान्।
विशुष्कास्यो मुहुः श्वासो मुहुश्चैवावधम्यते॥
मेघाम्बुशीतप्राग्वातैः श्लेष्मलश्च विवर्द्धते।
स याप्यस्तमकश्वासः साध्यो वा स्यान्नवोत्थितः।

ी उठती हो। वह सुखसाध्य और कम कष्ट देने वाली होती है। २–अन्नजा (१)हिक्का
। अधिक भोजन पान या बेकायदे भोजन–पानसे पीड़ित होकर वायु जो हिक्का करती है।
भोजनजनित पीड़ा कम होते ही बन्द हो जाती है। यह हिक्का दीर्घकालानुबन्धिनी नहीं
। ३–**गम्भीरा** नाभि स्थान से उठती है एवम् ऊंची आवाज के साथ आती और कठिन
ी है। ४–**यमला हिक्का** देरमें एक साथ दो दो दफा उठती है। ५–**महती हिक्का**

प्रतमकश्वासस्य लक्षणम्—

रमूर्च्छापरीतस्य विद्यात्प्रतमकं तु तम्। उदावर्त्तरजोजीर्णक्लिन्नकायनिरोधजः॥
सा वर्द्धतेऽत्यर्थं शीतश्चाशु प्रशाम्यति। मज्जतस्तमसीवास्य विद्यात्प्रतमकं तु तम्॥

क्षुद्रश्वासस्य लक्षणम्—

ायासोद्भवः कोष्ठे क्षुद्रो वातमुदीरयेत्। क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः॥
स्ति न स गात्राणि न च दुःखो यथेतरे। न च भोजनपानानां निरुणद्ध्युचितां गतिम्॥
नेन्द्रियाणां व्यथां चापि कांचिदापादयेद्रुजम्।
स साध्य उक्तो बलिनः सर्वे चाव्यक्तलक्षणाः॥

(१) हिक्काया विप्रकृष्टनिदानम्—

दाहिगुरुविष्टम्भिरूक्षाभिष्यन्दिभोजनैः। शीतपानाशनस्नानरजोधूमातपानिलैः॥
यामकर्मभाराध्ववेगघातापतर्पणैः। हिक्का श्वासश्च कासश्च नृणां समुपजायते॥

क्कायाः सम्प्राप्तिः **वायुः कफेनानुगतः पञ्च हिक्काः करोति हि।**
रूपं निरुक्तिश्च— **अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा॥**
मुहुर्मुहुर्वायुरुदेति सस्वनो यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन्।
स घोषवानाशु हिनस्त्यसून्यतस्ततस्तु हिक्केत्यभिधीयते बुधैः॥

अन्नजाया लक्षणम्–**पानान्नैरतिसम्भुक्तैः सहसा पीडितोऽनिलः।**
हिक्कयत्यूर्ध्वगो भूत्वा तां विद्यादन्नजां भिषक॥

यमलाया लक्षणम्–**चिरेण यमलैर्वेगैर्या हिक्का सम्प्रवर्त्तते।**
कम्पयन्ती शिरोग्रीवां यमलां तां विनिर्दिशेत्॥

क्षुद्राया लक्षणम्—**प्रकृष्टकालैर्या वेगैर्मन्दैः समभिवर्त्तते।**
क्षुद्रिका नाम सा हिक्का जत्रुमूलात्प्रधावति॥

म्भीराया लक्षणम्–**नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी।**
अनेकोपद्रववती गम्भीरा नाम सा स्मृता॥

महत्या लक्षणम्—**मर्माण्युत्पीडयन्तीव सततं या प्रवर्त्तते।**
महाहिक्केति सा ज्ञेया सर्वगात्रप्रकम्पिनी॥

असाध्यलक्षणम्—**आयम्यतो हिक्कतो यस्य देहो दृष्टिश्चोर्ध्वं ताम्यते यस्य नित्यम्।**
क्षीणोऽन्नद्विट् क्षौति यश्चातिमात्रं तौ द्वौ चान्त्यौ वर्जयेद्धिक्कमानौ॥

हमेशा चलती रहती है तथा मर्मों को पीड़ा देती हुई सब शरीर को कंपा कर उठती है। आमाशयस्थ वायु के विगड़ने से उत्पन्न होती है॥ २५॥

अग्निविकारभेदाः—**चत्वारोऽग्नेर्विकाराः स्युर्विषमो वातसम्भवः।**
तीक्ष्णः पित्तात्कफान्मन्दो भस्मको वातपित्तयोः॥२६॥

अग्नि(१) याने पाचकाग्नि के चार तरह के विकार होते हैं। १—**वात से** दूषित **विषमाग्नि,** २—**पित्त से** दूषित होने से **तीक्ष्णाग्नि,** ३—**कफ से** दूषित होने से ४—एवम् **वातपित्त से** दूषित होने से **भस्मक** नामक अग्नि का विकार होता है।

विमर्श—अन्यत्र समाग्नि के साथ पांच प्रकार का अग्नि कहा गया है। परन्तु विकार नहीं है, वह तो स्वाभाविक है, अतः उसका ग्रहण यहां विकार-गणना में किया १—वायु चञ्चल होने के कारण से अग्नि को कभी मन्द तथा कभी तीक्ष्ण कर देता है कभी तो हल्का भोजन भी नहीं पचता एवम् कभी भारी भोजन भी आसानी से पच २–**पित्त** स्वयम् तीक्ष्ण और अग्निस्वरूपी होने के कारण **पाचक-संस्थान** को अधिक

---

(१) सन्निकृष्टनिदानपूर्वकमग्निविवरणं- **मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः।**
कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः॥
निदानमतेन— **शार्ङ्गधरमतेन चतुर्थो भस्मको वातपित्तप्रकोपात्।**
समाग्निस्तु स्वाभाविकाग्निः॥

१–मन्दाग्निलक्षणम्—**स्वल्पाऽपि नैव मन्दाग्नेर्मात्रा भुक्ता विपच्यते।**
छर्दिः सादः प्रसेकः स्याच्छिरोजठरगौरवम्॥

२–तीक्ष्णाग्निलक्षणम्–**मात्राऽतिमात्राऽप्यशिता तीक्ष्णाग्नेः पच्यते सुखम्।**
अत एव हि केनापि मतस्तीक्ष्णाग्निरुत्तमः॥

३–विषमाग्निलक्षणम्–**अशिता खलु मात्राऽपि विषमाग्नेस्तु देहिनः।**
कदा चित्पच्यते सम्यक्कदा चिन्न विपच्यते।
तस्याध्मानमुदावर्त्तं शूलं जठरगौरवम्। प्रवाहणमतीसारस्तथा स्यादन्त्र

४–समाग्निलक्षणम्—**समा समाग्नेरशिता मात्रा सम्यग्विपच्यते।**
सोऽग्निरुत्तम एतेषु न तीक्ष्णस्तूत्तमो मतः॥
तीक्ष्णः पित्तसमुत्थानान्विषमो वातहेतुकान्।
तथा करोति मन्दाग्निर्विकारान् कफसम्भवान्॥

४–भस्मकस्य निदान–**कट्वादिरूक्षान्नभुजां नराणां क्षीणे कफे मारुतपित्तवृद्धौ।**
सन्प्राप्तिपूर्वकं- **अतिप्रवृद्धः पवनान्वितोऽग्निर्भुक्तं क्षणाद् भस्मकरोति**
लक्षणम्— **तस्मादसौ भस्मकसंज्ञकोऽभूदुपेक्षितोऽयं पचते च धातून्।**

भस्मकोपद्रवाः—**तृट्स्वेददाहमूर्च्छाऽऽदीन् कृत्वैषोऽत्यग्निसम्भवान्।**
पक्त्वाऽन्नमाशु धात्वादीन् स क्षिप्रं नाशयेद् ध्रुवम्॥

करता है, जिससे गुरु भोजन भी हमेशा सुखपूर्वक पच जाया करता है एवम् भूख बनी ही रहती है। ३—**कफ** मन्द एवम् जड़ तथा स्यन्दात्मक होने के कारण **पाचक-संस्थान** को भी मन्दक्रिय बना देता है, अतः हलका भोजन खाने पर भी हजम नहीं होता। ४—यदि **वात** तथा **पित्त** दोनों ही **पाचक-संस्थान** को विकृत करें तो **पित्त** का तीक्ष्ण एवम् **वात** का सन्धुक्षण स्वभाव होने से तथा दोनों शोषक होने से अग्नि को इतना तेज़ कर देते हैं कि लकड़ी और पत्थर भी यदि खा लिये जायँ तो हज़म हो जायेंगे। इसे **भस्मक** रोग कहते हैं। यह शरीर के रस धातु को सुखा डालता है, अतः इस रोग वाले को सर्वदा ही भूख और प्यास बनी रहती है। यदि क्षण भर भी भोजन न मिला तो जान निकलने पर आ जाती है॥ २६'॥

अरोचकभेदाः—**पञ्चैवारोचका ज्ञेया वातपित्तकफैस्त्रिधा ।**
सन्निपातान्मनस्तापात् ……॥ २७ ॥

(१)**अरोचक** या अरुचि पांच तरह का होता है। १—वात से, २—पित्त से, ३—कफ से, ४—सन्निपात से और ५—मनस्ताप से।

विमर्श—भूख होने पर भी खाने की इच्छा का न होना ही **अरोचक** है। **वात अरोचक** में मुख खट्टा, तीता तथा पूतिगन्ध-युक्त होता है। **पित्त अरोचक** में मुख मीठा तथा नमकीन स्वादवाला और **कफ** से लिपा हुआ सा होता है। **त्रिदोषज अरोचक** में मुख का स्वाद कभी एकसा नहीं रहता, कभी कसैला, कभी खट्टा, कभी मीठा, कभी निमकीन रहता है। जो **अरोचक मनस्ताप** यानी क्रोध, घृणा, शोक, भय, लोभ प्रभृति मानसिक दोष से उत्पन्न

---

(१) अरुचिरोगस्य निदा-**वातादिभिः शोकभयातिलोभक्रोधैर्मनोघ्नाशनरूपगन्धैः ।**
नपूर्वकं लक्षणम्— **अरोचकाः स्युः परिहृष्टदन्तकषायवक्त्रस्य मतोऽनिलेन ।**
कट्वम्लमुष्णं विरसञ्च पूति पित्तेन विद्याल्लवणं च वक्त्रम् ।
माधुर्यपैच्छिल्यगुरुत्वशैत्यविबुद्धसम्बद्धयुतं कफेन ॥

४-५-मनोऽभिघात (शोकभयलोभादि) ज-सन्निपातजयोर्लक्षणे—

अरोचके शोकभयातिलोभक्रोधाद्यहृद्याशुचिगन्धजे स्यात् ।
स्वाभाविकं चास्यमथारुचिश्च त्रिदोषजे नैकरसं भवेत्तु ॥
हृच्छूलपीडनयुतं पवनेन पित्तात्तृड्दाहचोषबहुलं सकफप्रसेकम् ॥
श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्याद्वैगुण्यमोहजडताभिरथापरं च ॥

वृद्धभोजमतेन—**प्रक्षिप्तं च मुखे चान्नं यत्र नास्वदते नरः ।**
अरोचकः स विज्ञेयो भक्तद्वेषमथो शृणु ॥
चिन्तयित्वा तु मनसा दृष्ट्वा स्पृष्ट्वा तु भोजनम् ।
द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते ॥
कुपितस्य भयार्त्तस्य तथा भक्तविरोधिनः ।
यत्र नान्ने भवेच्छ्रद्धा स भक्तच्छन्द उच्यते ॥

होता है, उसमें मुख का स्वाद मामूली सा रहता है, पर खाने की इच्छा नहीं होती। अ कथित **भक्तद्वेष** और **भक्तच्छन्द** प्रभृति अरोचक के भेद भी इसी के अन्दर आ जाते हैं, उनकी पृथक् गणना यहाँ नहीं की गई है ॥ २७ ॥

छर्दिभेदाः—…………छर्दयः सप्तधा मताः ।

त्रिभिर्दोषैः पृथक्तिस्त्रः क्रमिभिः सन्निपाततः ।

घृणया च तथा स्त्रीणां गर्भाधानाच्च जायते ॥ २८ ॥

(१)**छर्दि** या वमन रोग सात प्रकार का होता है। १—वात से २—पित्त से, ३—कफ से, ४—सन्निपात से, ५—क्रिमिदोष से, ६—घृणा से तथा ७—स्त्रियों को गर्भाधान से।

---

(१) छर्देर्विप्रकृष्टस-अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि ।

न्निकृष्टनिदानपूर्विका- अकाले चातिमात्रैश्च तथाऽसात्म्यैश्च भोजनैः ॥

सम्प्राप्तिः— आमाद् भयात्तथोद्वेगादजीर्णात् क्रिमिदोषतः ।

नार्याश्चापन्नसत्त्वायास्तथाऽतिद्रुतमश्नतः ॥

बीभत्सैर्हेतुभिश्चान्यैर्भुक्तमुत्क्लिश्यते बलात् ।

दुष्टैर्दोषैः पृथक् सर्वैर्बीभत्सालोकनादिभिः ॥

छर्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते ॥

सामान्यलक्षणम्— छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः ।

निरुच्यते च्छर्दिरिति दोषो वक्त्रं प्रधावितः ॥

१–वातिकलक्षणम्—हृत्पार्श्वपीडामुखशोषशीर्षनाभ्यर्त्तिकासस्वरभेदतोदः ।

उद्गारशब्दं प्रबलं सफेनं विच्छिन्नकृष्णं तनुकं कषायम् ॥

कृच्छ्रेण चाल्पं महता च वेगेनार्त्तोऽनिलाच्छर्दयतीह दुःखम् ॥

२–पैत्तिकलक्षणम्—मूर्च्छापिपासामुखशोषशीर्षताल्वक्षिसन्तापतमोभ्रमार्त्तः ।

पीतं भृशोष्णं हरितं सतिक्तं धूमं च पित्तेन वमेत् सदाहम् ॥

३–कफजलक्षणम्—तन्द्राऽऽस्यमाधुर्यकफप्रसेकसन्तोषनिद्राऽरुचिगौरवार्त्तः ।

स्निग्धं घनं स्वादु कफाद् विशुद्धं स रोमहर्षोऽल्परुजं वमेत् ॥

४–त्रिदोषजलक्षणम्—शूलाविपाकारुचिदाहतृष्णाश्वासप्रमोहप्रबलाप्रसक्तम् ।

छर्दिस्त्रिदोषाल्लवणाम्लनीलसान्द्रोष्णरक्तं वमतां नृणां स्यात् ॥

५–६–७–मनोऽभिघात–क्रिमि–दौहृदज–च्छर्दिविशेषलक्षणम्—

असात्म्यजा च क्रिमिजाऽऽमजा च बीभत्सजा दौहृदजा च या हि ।

सा पञ्चमी तां च विभावयेच्च दोषोच्छ्रयेणैव यथोक्तमादौ ॥

शूलहृल्लासबहुला क्रिमिजा च विशेषतः । क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षिता ॥

तस्योपद्रवाः—कासः श्वासो ज्वरस्तृष्णा हिक्का वैचित्यमेव च ।

हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्देरुपद्रवाः ॥

विमर्श—वातज वमन में वमन कसैला सा खूब जोर से और थोड़ा थोड़ा होता है। **पित्तज** में खट्टा सा, पीला सा और तीक्ष्ण द्रव्य वमन होता है एवम् मुख से धूआँ सा निकलता मालूम होता है। **कफज वमन** में मीठा सा होता है तथा कफ के अन्य लक्षण होते हैं। **त्रिदोषज वमन** में नमकीन, खट्टा, नीला, लाल, सान्द्र तथा उष्ण वमन होता है। और उपद्रव-युक्त होता है। कभी कभी मल-मूत्र जैसा भी दुर्गन्धित वमन होता है। यह असाध्य लक्षण है। क्रिमि के दोष से उत्पन्न वमन रोग में जी का मिचलाना, आमाशय में तोद तथा शूल और कृमिज-हृद्रोग के लक्षण होते हैं। आमाशय में कृमि होने से ही यह होता हैं। घृणित रूप-रस-गन्ध आदि के कारण भी वमन हो जाया करता है। कभी कभी तो उनके स्मरण मात्र से ही वमन हो जाता है। कई लोग ऐसे भी होते देखे गये हैं कि किसी को कय करते देखा और उनको कय आने लगी। ये सबही असात्म्य-रूपरसादि के कारण होते हैं तथा मन से भी सम्बन्ध रखते हैं।

गर्भावस्था में स्त्रियों को वमन आया करते हैं। इसमें कोई विकृत स्वाद या अन्य लक्षण नहीं होते। सिर्फ वमन ही आया करते हैं। जो भुक्त द्रव्यों के रसगन्धादि से युक्त होते हैं। यह प्रायः प्रारम्भ के कुछ मासों में होता है, पर किसी किसी को प्रसवपर्य्यन्त भी वमन होते रहते हैं। यद्यपि कृमिज-प्रभृति में भी दोषों का संबन्ध रहता ही है, फिर भी चिकित्सा में भेद होने के कारण से इनको अलग गिना गया है ॥ २८ ॥

स्वरभेदभेदाः—**स्वरभेदाः षडेव स्युर्वातपित्तकफैस्त्रयः ।**

मेदसा सन्निपातेन क्षयात्षष्ठः प्रकीर्त्तितः ॥ २९ ॥

(१)**स्वरभेद** रोग छः प्रकार का होता है। १—वात से, २—पित्त से ३—कफ से, ४-सन्निपात से, ५-मेद से ६-और क्षय से।

---

(१) स्वरभेदस्य निदानसम्प्राप्तिपूर्वकं लक्षणम्—

अत्युच्चभाषणविषाध्ययनाभिघातसन्दूषणैः प्रकुपिताः पवनादयस्तु ।
स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां हन्युः स्वरं भवति चापि हि षड्विधः सः ॥

१-वातजलक्षणम्—**वातेन कृष्णनयनाननमूत्रवर्चा भिन्नं स्वरं वदति गर्द्दभवत्खरं च ।**

२-पित्तजलक्षणम्—**पित्तेन पीतनयनाननमूत्रवर्चा ब्रूयाद् गलेन स च दाहसमन्वितेन ।**

३-कफजलक्षणम्—**ब्रूयात् कफेन सततं कफरुद्धकण्ठः—**
स्वल्पं शनैर्वदति चापि दिवा विशेषात् ॥

४-सन्निपातजलक्षणम्—

सर्वात्मके भवति सर्वविकारसम्पत्तं चात्यसाध्यमृषयः स्वरभेदमाहुः ।

५-क्षयजलक्षणम्—

धूम्येत वाक् क्षयकृते क्षयमाप्नुयाच्च वागेष चापि हतवाक् परिवर्जनीयः ॥

६-मेदोजलक्षणम्-**अन्तर्गतस्वरमलक्ष्यपदं चिरेण मेदोऽन्वयाद्वदति दिग्धगलस्तृषाऽऽर्त्तः॥**

विमर्श—स्वर यानी गले का बैठ जाना या बिगड़ जाना ही **स्वरभेद** है। वा स्वरभेद में मनुष्य धीरे २ तथा गधे के जैसा उद्वेजक स्वर में बोलता है। **पित्तज** स्व बोलते वक्त गले में जलन होती है। तथा **कफज** स्वरभेद में बोलते बोलते गले में कफ जाने से मनुष्य रुक जाता है। **सन्निपातज** स्वरभेद में सर्वविध विकार होते हैं। मेद जाने से मनुष्य गले में लिहसा हुआ सा देर में तथा गले के अन्दर ही बोलता है। एवम् से व्याकुल रहता है।

धातुक्षय होने से उत्पन्न स्वरभेद में आदमी बहुत ही धीरे तथा धूएँ से गला हुआ सा बोलता है। गले में स्वरवाहिनी नाडियों के तथा स्वरयंत्र के बिगड़ने से स्व भेद होता है ॥ २९ ॥

तृष्णाभेदाः—**तृष्णा च षड्विधा प्रोक्ता वातात्पित्तात्कफादपि ।**
त्रिदोषैरुपसर्गेण क्षयाद्धातोश्च षष्ठिका ॥ ३० ॥

(१)**तृष्णा** रोग छः प्रकार का होता है। १–वातज, २–पित्तज, ३–कफज, ४–त्रि

असाध्यलक्षणम्—**क्षीणस्य बृद्धस्य कृशस्य चापि चिरोत्थितो यस्य सहोपजातः।**
मेदस्विनः सर्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति ॥

(१) **तृष्णा शार्ङ्गमतेन षट् किन्तु माधवमतेन सप्त।शार्ङ्गधरो भुक्तोद्भवां न विकारजां** तस्या निदानपूर्विकास-**भयश्रमाभ्यां बलसंक्षयाद्वाऽप्यूर्ध्वाचितं पित्तविवर्द्धनैश्च।**
म्प्राप्तिः— **पित्तं सवातं कुपितं नराणां तालुप्रपन्नं जनयेत् पिपासाम्।**
स्रोतःस्वपां वाहिषु दूषितेषु दोषैश्च तृट् सम्भवतीह जन्तोः।
तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथाऽन्याऽऽमसमुद्भ
भक्तोद्भवा सप्तमिकेति तासां निबोध लिङ्गान्यनुपूर्वशस्तु।
सामान्यलक्षणम्—**ताल्वोष्ठकण्ठास्यविशोषदाहसन्तापमोहभ्रमविप्रलापाः।**
सर्वाणि रूपाणि भवन्ति तस्यामुत्पत्तिकाले तु विशेषतो हि
१–वातजतृष्णालक्ष-**क्षामास्यता मारुतसम्भवायां तोदस्तथा शङ्खशिरःसु चापि**
णम्— **स्रोतोनिरोधो विरसं च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति।**
२–पित्तजतृष्णालक्ष-**मूर्च्छाऽन्नविद्वेषविलापदाहा रक्तेक्षणत्वं प्रततश्च शोषः।**
णम्— **शीताभिनन्दा मुखतिक्तता च पित्तात्मिकायां परिधूपनं च।**
३–श्लेष्मजतृष्णालक्ष-**बाष्पावरोधात् कफसंवृतेऽग्नौ तृष्णा बलासेन भवेत्तथा तु।**
णम्— **निद्रा गुरुत्वं मधुरास्यता च तृष्णाऽर्दितः शुष्यति चातिम**
४–५–क्षयजतृष्णालक्ष-**रसक्षयाद् या क्षयसम्भवा सा तयाऽभिभूतस्तु निशादिनेषु**
णम्, आमजसन्निपात-**पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति के चि**
जयोरपि— **रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग्व्यवस्येत्।**
त्रिदोषलिङ्गामसमुद्भवा तु हृच्छूलनिष्ठीवनसादकर्त्री।

५–उपसर्गज यानी आगन्तुक और ६–धातुक्षयजनित ।

विमर्श—जलवाहिनी नाडियों के दूषित होने से ही तृष्णा उत्पन्न होती है । प्रायः सब तृष्णा में ही **वात** और **पित्त** का प्रकोप रहता है, क्योंकि ये ही दो दोष शोषण करने वाले हैं । **आगन्तुक तृष्णा** चोट आदि के लगने, मार–पीट तथा भय आदि से होती है । **क्षयज तृष्णा** रस धातु के क्षय से अथवा अधिक रक्तस्राव से होती है । प्यास तो साधारणतः सब प्राणियों को होती है, पर जब साधारण से ज्यादा प्यास हो एवम् बारबार पानी पीने पर भी न जाय तो वह रोग है । अतितीक्ष्ण, नमकीन, अम्ल और भारी भोजन से तथा आमदोष से जो तृष्णा होती है वह दोषों को ही कुपित करके होती है, अतः उनकी गणना पृथक् नहीं की गयी । वैद्य **निदान** से ही उसे जाने ॥ ३० ॥

मूर्च्छाभ्रमनिद्रातन्द्रा- **मूर्च्छा चतुर्विधा ज्ञेया वातपित्तकफैः पृथक् ॥ ३१ ॥**
संन्यासग्लानि- **चतुर्थी सन्निपातेन तथैकश्च भ्रमः स्मृतः ।**
भेदाः— **निद्रा तन्द्रा च संन्यासो ग्लानिश्चैकैकशः स्मृताः ॥ ३२ ॥**

(१) **मूर्च्छा** रोग चार प्रकार का होता है । १—वातज, २—पित्तज, ३—कफज एवम् ४—सन्निपातज ।

६–उपसर्गज (आगन्तु- **दीनस्वरः प्रताम्यन् दीनाननशुष्कहृदयगलतालुः ।**
क) तृष्णालक्षणम्— **भवति खलु सोपसर्गा तृष्णा सा शोषिणी कष्टा ॥**
क्षतजागन्तुजयोर्लक्षणे- **क्षतस्य रुक्शोणितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु ॥**
७–अन्नजतृष्णालक्षणम्- **स्निग्धं तथाऽम्लं लवणं च भुक्तं गुर्वन्नमेवाशु तृषां करोति ॥**
उपद्रवयुक्ततृष्णालक्ष- **ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहानाम् ॥**
णम्— **सर्वास्त्वतिप्रसक्ता रोगकृशानां वमिप्रसक्तानाम् ।**
घोरोपद्रवयुक्तास्तृष्णा मरणाय विज्ञेया ॥

(१) मूर्च्छाया निदानपूर्विका सम्प्राप्तिः—

क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः । वेगाघातादभीघाताद्धीनसत्त्वस्य वा पुनः ॥
करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च । निवसन्ति यदा दोषास्तदा मूर्च्छन्ति मानवाः॥

सामान्यलक्षणम्—

संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः । तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत्॥
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत्। मोहो मूर्च्छेति तामाहुः षड्विधा सा प्रकीर्त्तिता॥

वातजामाह—

नीलं वा यदि वा कृष्णमाकाशमथवाऽरुणम्। पश्यंस्तमः प्रविशति शीघ्रं च प्रतिबुद्ध्यते॥
वेपथुश्चाङ्गमर्दश्च प्रपीडा हृदयस्य च । कार्श्यं श्यावारुणच्छाया मूर्च्छाये वातसम्भवे ॥

पित्तजामाह—

रक्तं हरितवर्णं वा वियत्पीतमथापि वा । पश्यंस्तमः प्रविशति सस्वेदश्च प्रबुद्ध्यते ॥

विमर्श—जब दोष प्रबल होकर इन्द्रिय एवम् मनोवह स्रोतों को रोक देते हैं तब मु एकदम अन्धकार छा जाता है और मनुष्य बेहोश होकर गिर पड़ता है। यही मूर्च्छा मोह है। अन्यत्र वातादि से तीन, रक्त से, मद्य तथा विष से, इस प्रकार छः प्रकार की मू कथित है ; पर रक्त वातादि से ही दूषित होकर मूर्च्छा उत्पन्न करता है एवम् मद्य और वि अपने प्रभाव से दोषों का ही उद्रेक करके मूर्च्छा उत्पन्न करते हैं अतः उनका यहां चतुर्विध में ही अन्तर्भाव हो जाता है। विषजन्य मूर्च्छा त्रिदोषज होती है। अन्यत्र हेतुप्रत्यनीक **चिकित्सा** के लिये भेद दर्शाया गया है। सब तरह की मूर्च्छा में पि प्रबल होता है तथा तमोगुण के साथ मिलकर मूर्च्छा उत्पन्न करती है।

भ्रमरोग एक ही तरह का होता है।

विमर्श—इसमें रजोगुण, पित्त एवम् वायु के कारण से सिर में चक्कर आते हैं मनुष्य गिर पड़ता है। भ्रम होते समय ऐसा मालूम होता है मानो शरीर चक्रारूढ सा रहा हो। इसका **अन्यभ्रम** यानी इन्द्रियभ्रम (जिसमें इन्द्रियों से यथायथ ज्ञान नहीं हो भेद करना चाहिये।

निद्रा, तन्द्रा, संन्यास एवम् ग्लानि भी प्रत्येक एक २ प्रकार के होते हैं।

विमर्श—निद्रारोग में प्राणी मामूली से अधिक सोता है। आजकल जो **कुम्भक निद्रा** की बात कहीं कहीं अखबारों में सुनी जाती है, वह यही रोग है। यह श्लेष्मा **तमोगुण** की अधिकता से होती है ; अतः कफप्रकृति वाला तथा तामसिक गुण वाला सोता है। **स्वाभाविक निद्रा** मन के क्लान्त होकर विषयों से निवृत्त हो **मेध्यानाड़ी** लीन होने से होती है। यह सब प्राणियों के लिये परमावश्यक है। पर **अस्वाभाविक** तमोगुणयुक्त श्लेष्मा के मनोवह-स्रोतों के रास्ते को रोक देने के कारण से उत्पन्न होती **तन्द्रा** भी निद्रा का ही एक भेद है, पर यह सिर्फ इन्द्रियों पर ही होती है। इन्द्रियार्थों अप्राप्ति, शरीर में भारीपन, जम्भाई और थकान तथा निद्रार्त्त पुरुष जैसी चेष्टाएँ इसके हैं। यह तमोगुण और वातकफ से होती है।

संन्यास एक प्रबल रोग है। दोष जब अधिक प्रबल होकर शरीर के सब संज्ञावह को दूषित कर शरीर, वाणी और मन को चेष्टाशून्य कर देते हैं तब मनुष्य कटे पेड़ जैसा

सपिपासः ससन्तापो रक्तपीताकुलेक्षणः। जातमात्रे च पतति शीघ्रं च प्रतिबुध्यते।
सम्भिन्नवर्चाः पीताभो मूर्च्छाये पित्तसम्भवे॥

कफजामाह—

मेघसङ्काशमाकाशमावृतं वा तमोघनैः। पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते।
गुरुभिः प्रावृतैरङ्गैर्यथैवार्द्रेण चर्मणा। सप्रसेकः सहृल्लासो मूर्च्छाये कफसम्भवे॥

सान्निपातिकीमाह—

सर्वाकृतिः सन्निपातादपस्मार इवागतः। सा जन्तुं पातयत्याशु विना बीभत्सचेष्टितैः।

पड़ता है एवम् यदि सद्यःफल प्रद कोई चिकित्सा तुरन्त न की गई तो मर जाता है। यही **संन्यास** है। इसमें मनुष्य सर्वविध शारीर एवम् मानस कर्म का त्याग कर मृतवत् हो जाता है, अतः इसका नाम **संन्यास** रखा गया है।

जब आदमी को बिना परिश्रम थकान हो, हृदय में उद्वेष्टन हो, आलस मालूम हो तथा खाने की इच्छा न हो तो उसको **ग्लानि** कहते हैं। यह ओजःक्षय, रसाजीर्ण तथा दुःख आदि के कारण से होता है॥ ३१–३२॥

मदरोगभेदाः—**मदाः सप्त समाख्याता वातपित्तकफैस्त्रयः।**
त्रिदोषैरसृजा मद्याद्विषादपि च सप्तमः॥ ३३॥

रक्तजामाह—

पृथिव्यम्भस्तमोरूपं रक्तगन्धस्तदन्वयः। तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः॥
द्रव्यस्वभाव इत्येके दृष्ट्वा यदभिमूर्च्छति। दर्शनादसृजस्तस्माद् गन्धाच्चैव प्रमुह्यति॥
स्तब्धाङ्गदृष्टिस्त्वसृजा गूढोच्छ्वासश्च मूर्च्छितः॥

विषजां मद्यजां चाह—**गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः।**
त एव तस्मात्ताभ्यां तु मोहौ स्यातां यथेरितौ॥
मद्येन विलपञ् शेते नष्टविभ्रान्तमानसः।
गात्राणि विक्षिपन् भूमौ जरां यावन्न याति तत्॥

वेपथुस्वप्नतृष्णाः स्युस्तमश्च विषमूर्च्छिते। वेदितव्यं तीव्रतरं यथास्वविषलक्षणैः॥

च्छातन्द्राऽऽदीनां भेदाः—**मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद् भ्रमः।**
तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा॥

न्द्राऽऽदोनां लक्षणानि—**इन्द्रियार्थेष्वसम्प्राप्तिर्गौरवं जृम्भणं क्लमः।**
निद्राऽऽर्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत्॥

निद्रालक्षणम्—**यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः।**
विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः॥

संन्यासस्य लक्षणं स-**वाग्देहमनसां चेष्टामाक्षिपन्ति बलान्मलाः।**
म्प्राप्तिश्च—**संन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः॥**
स ना संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः।
प्राणैर्विमुच्यते शीघ्रं मुक्त्वा सद्यःफलां क्रियाम्॥

ंन्यासमूर्च्छयोर्भेदः—**दोषेषु मदमूर्च्छायाः कृतवेगेषु देहिनाम्।**
स्वयमेवोपशाम्यन्ति संन्यासो नौषधैर्विना॥

ानि (क्लम) लक्षणम्—**योऽनायासश्रमो देहे हृदयोद्वेष्टनं क्लमः।**
न चान्नमभिकाङ्क्षेद् ग्लानिं तस्य विनिर्दिशेत्॥

(१)**मदराग** सात प्रकार का होता है। १-वातज मद, २-पित्तज मद, ३-कफज ४-सन्निपातज मद, ५-रक्तज मद, ६-मद्यजनित मद, तथा ७ विषजनित मद।

विमर्श—इस रोग में रोगी को नशा सा बना रहता है। **वातादि दोषों से** **मद** यथादोष-लक्षण सहित होते हैं। **रक्तज मद** में पित्तलिङ्ग होते हैं तथा नेत्र-रहते हैं। शराब के पीने से **मद्यमद** होता है जो सर्वविदित है। इसमें रोगी के मुख से गन्ध आती रहती है। **विषजनित मद** में विष के लक्षण प्रकट होते हैं॥ ३३॥

मदात्ययभेदास्तद—**मदात्ययश्चतुर्द्धा स्याद्वातपित्तकफादपि।**

वान्तरभेदाश्च—**त्रिदोषैरपि विज्ञेय एकः परमदस्तथा॥ ३४॥**

पानाजीर्णं तथा चैकं तथैकः पानविभ्रमः। पानात्ययस्तथा चैकः……॥

(२)**मदात्यय** रोग चार प्रकार का होता है। १-वातज, पित्तज, कफज और त्रि

---

(१) मद्यस्वभावः— **मद्यं स्वभावतः प्राज्ञैर्यथैवान्नं तथा स्मृतम्।**
अयुक्तियुक्तं रोगाय युक्तियुक्तं रसायनम्॥

मदभेदानाह लक्षणञ्च—**मदस्तु त्रिविधः प्रोक्तः सात्त्विकादिविभेदतः।**
आचार्याः के चिदिच्छन्ति चतुर्थमपि तामसम्॥
सात्त्विके गीतहास्याद्यं तामसे साहसादिकम्।
राजसे पुरुषे मद्यं निद्राऽऽलस्यादिकारकम्॥
मृततुल्यं करोत्येव मद्यं चैवातितामसम्।
नातिमाद्यन्ति,बलिनः कृताहारा महाशनाः।
स्निग्धाः सत्त्ववयोयुक्ता मद्यनित्यास्तदन्वयाः॥
मेदःकफाधिका मन्दवातपित्ता दृढाग्नयः।
विपर्ययेऽति माद्यन्ति विश्रब्धाः कुपिताश्रये॥
मद्येन चाम्लरूक्षेण साजीर्णे बहुनाऽपि च॥

(२) मदात्ययनिदानम्—
विषस्य ये गुणा दृष्टाः सन्निपातप्रकोपणाः। त एव मद्ये दृश्यन्ते विषे तु बल
तस्मादविधिपीतेन तथा मात्राऽधिकेन च। युक्तेन चाहितैरन्नैरकाले सेवित
मद्येन खलु जायन्ते मदात्ययमुखा गदाः।
निर्भुग्नमेकान्तत एव मद्यं-निषेव्यमाणं मनुजेन नित्यम्।
उत्पादयेत्कष्टतमान्विकारानापादयेच्चापि शरीरभेदम्।
क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन॥
व्यायामभाराध्वपरिक्षतेन-वेगावरोधाभिहतेन चापि।
अत्यम्लभक्ष्यावततोदरेण साजीर्णभुक्तेन तथाऽबलेन॥
उष्णाभितप्तेन च सेव्यमानं करोति मद्यं विविधान्विका

विमर्श—मद्य के बेकायदे उपयोग से यह उत्पन्न होता है। पुरुष की प्रकृति और मद्य का स्वभाव आदि कारण में जिस दोष का कोप होता है **मदात्यय** भी उसी दोष से उत्पन्न होता है। एक **परमद,** एक **पानाजीर्ण,** एक **पानविभ्रम** और एक **पानात्यय** भी मद्य के दुरुपयोग से ही होते हैं।

मद्यविकाराः—**पानात्ययं परमदं पानाजीर्णमथापि वा।**
पानविभ्रममत्युग्रं तेषां वक्ष्यामि लक्षणम्॥

सामान्यलक्षणम्—

शरीरदुःखं बलवत्प्रमोहो हृदयव्यथा। अरुचिः प्रततं तृष्णा ज्वरः शीतोष्णलक्षणः॥
शिरःपार्श्वास्थिसन्धीनां वेदना वीक्षते यथा। जायतेऽतिबला जृम्भा स्फुरणं वेपनं श्रमः॥
उरो विबन्धं कासश्च हिक्का श्वासः प्रजागरः। शरीरकम्पः कर्णाक्षिमुखरोगास्त्रिकग्रहः॥
छर्दिर्विड्भेद उत्क्लेशो वातपित्तकफात्मकः। भ्रमः प्रलापो रूपाणामसतां चैव दर्शनम्॥
तृणभस्मलतापर्णपांशुभिश्चावपूरणम्। प्रधर्षणं विहङ्गैश्च भ्रान्तचेताः स मन्यते॥
व्याकुलानामशस्तानां स्वप्नानां दर्शनानि च।
मदात्ययस्य रूपाणि सर्वाण्येतानि लक्षयेत्॥

वातजस्य निदानं लक्षणं च—**स्त्रीशोकभयभाराध्वकर्मभिर्योऽतिकर्षितः।**
रूक्षाल्पप्रमिताशी च यः पिबत्यतिमात्रया॥
रूक्षं परिणतं मद्यं निशि निद्रां निहत्य च। करोति तस्य तच्छीघ्रं वातप्रायं मदात्ययम्॥
हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः।
विद्याद् बहुप्रलापस्य वातप्रायं मदात्ययम्॥

पैत्तिकस्य निदानं लक्षणं च—**तीक्ष्णोष्णमद्यमम्लं च योऽतिमात्रं निषेवते।**
अम्लोष्णतीक्ष्णभोजी च क्रोधनोऽग्न्यातपप्रियः॥
तस्योपजायते तीव्रः पित्तप्रायो मदात्ययः। तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः॥
विद्याद्धरितवर्णस्य पित्तप्रायम्मदात्ययम्।

कफजस्य निदानं लक्षणञ्च—

मधुरः स्निग्धगुर्वाशी यः पिबत्यतिमात्रया। अव्यायामदिवास्वप्नशय्याऽऽसनसुखे रतः॥
मदात्ययं कफप्रायं स नरो लभते ध्रुवम्। छर्द्यरोचकहृल्लासतन्द्रास्तमित्यगौरवैः॥
विद्याच्छीतपरीतस्य कफप्रायम्मदात्ययम्।

सन्निपातजस्य लक्षणम्—**ज्ञेयस्त्रिदोषजश्चापि सर्वलिङ्गैर्मदात्ययः॥**

परमदलक्षणम्—

श्लेष्मोच्छ्रयोऽङ्गगुरुता मधुरास्यता च। विण्मूत्रशक्तिरथ तन्द्रिररोचकश्च॥
लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञास्तृष्णा रुजा शिरसि सन्धिषु चातिभेदः॥

विमर्श—ये भी **मदात्यय** के ही भेद हैं। एक साथ ही अधिक और तेज शराब से **परमद**, शराब के हजम न होने से **पानाजीर्ण**, विकृत शराब तथा विकृत अन्न के सेवन से **पानविभ्रम**, और लगातार अधिक शराब पीने की आदत से **पानात्यय** रोग होते हैं॥३५॥

दाहभेदाः—······**दाहाः सप्त मतास्तथा। रक्तपित्तात्तथा रक्तात्तृष्णायाः पित्ततस्तथा।**
धातुक्षयान्मर्मघाताद्रक्तपूर्णोदरादपि ॥ ३६ ॥

(१)**दाहरोग** सातप्रकार का होता है। १ रक्तपित्त से, २ रक्त से, ३ तृष्णा से, ४ पित्त से, ५ धातुक्षय से, ६ मर्मघात से, तथा ७ कोठे में रक्त भर जाने से **दाहरोग** होता है।

विमर्श—दाह पित्तमूर्च्छित रक्त से उत्पन्न होता है। यह त्वचा पर ही होता है।

पानाजीर्णलक्षणम्—

आध्मानमुग्रमथवोद्गिरणं विदाहः। पाने त्वजीर्णमुपगच्छति लक्षणानि।
ज्ञेयानि तत्र भिषजा सुविनिश्चितानि। पित्तप्रकोपजनितानि च कारणानि॥

पानविभ्रमलक्षणम्—

हृद्गात्रतोदकफसंस्रवकण्ठधूममूर्च्छावमिज्वरशिरोरुजनप्रदेहाः।
द्वेषः सुरान्नविकृतेषु च तेषु तेषु तं पानविभ्रममुशन्त्यखिलेन धीराः॥

पानात्ययलक्षणम्—

हीनोत्तरौष्ठमतिशीतममन्ददाहतैलप्रभास्यमतिपानहतं त्यजेत्तु।
जिह्वौष्ठदन्तमसितं त्वथवाऽपि नीलं पीते च यस्य नयने रुधिरप्रभे वा॥

मदात्ययस्योपद्रवाः—

हिक्काज्वरौ वमथुवेथुपार्श्वशूलाः कासभ्रमवापि च पानहतं भजन्ते।

(१) रक्तपित्तजदाहस्य निदानं लक्षणञ्च—

कृत्स्नदेहानुगं रक्तमुद्रिक्तं दहति ध्रुवम्। शुष्यते तृष्यते चैव ताम्राभस्ताम्रलोचनः।
लोहगन्धाङ्गवदनो वह्निनेवावकीर्यते॥

रक्तपूर्णकोष्ठजमाह—**अस्रजा पूर्णकोष्ठस्य दाहोऽङ्गे स्यात्सुदुःसहः।**

तृषानिरोधजमाह—**तृषानिरोधादब्धातौ क्षीणे तेजः समुत्थितम्।**
स बाह्याभ्यन्तरं देहं प्रदहेन्मन्दचेतसः। स शुष्कगलताल्वोष्ठो जिह्वां निष्कास्य वेपते॥

पित्तजमाह—**पित्तज्वरसमः पित्तदाहः स्यात्तस्य संक्रमः।**

धातुक्षयजमाह—**धातुक्षयोत्थो यो दाहस्तेन मूर्च्छातृषाऽन्वितः।**
क्षामस्वरः क्रियाहीनः स सीदेद् भृशपीडितः॥

मर्माभिघातजमाह—**मर्माभिघातजोऽप्यस्ति स चासाध्यतमो मतः।**
सर्वं एव च बर्ज्याः स्युः शीतगात्रेषु देहिषु॥

मद्यजमाह—**त्वचं प्राप्तः स पानोष्मा पित्तरक्ताभिमूर्च्छितः।**
दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजम्॥

कभी कभी अन्दर कोष्ठ, हृदय आदि में भी होता है। यह अन्य रोगों में लक्षण या उपद्रव के रूप में तथा स्वतन्त्र भी होता है। इसकी चिकित्सा पित्तवत् जानें ॥ ३६ ॥

उन्मादभेदाः-**उन्मादाः षट् समाख्यातास्त्रिभिर्दोषैस्त्रयश्च ते ।**
सन्निपाताद्विषाज्ज्ञेयः षष्ठो दुःखेन चेतसः ॥ ३७ ॥

उन्माद(१) **रोग** या पागलपन का रोग छः प्रकार का होता है। १–वातज, २–पित्तज, ३–कफज, ४–त्रिदोषज, ५–विषज तथा ६–छठा मन के दुःख यानी अभिघात से **उन्माद रोग** उत्पन्न होता है।

विमर्श—दोष जब निदानानुसार कुपित होकर बुद्धिस्थान हृदय को दूषित करते हैं एवं **मनोवह स्रोतों** पर अधिष्ठित हो जाते हैं, तब मनुष्य के चित्त को मोहग्रस्त कर देते हैं। इससे बाह्यज्ञान ठीक ठीक नहीं होता, विचार शक्ति नष्ट हो जाती है तथा मन में विचित्र ख्यालात

---

(१) उन्मादस्य सम्प्राप्तिः—**मदयन्त्युद्धता दोषा यस्मादुन्मार्गमागताः ।**
मानसोऽयमतो व्याधिरुन्माद इति कीर्त्यते ॥

वातिकमाह—**रूक्षाल्पशीतान्नविरेकधातु-क्षयोपवासैरनिलोऽतिवृद्धः ।**
चिन्ताऽऽदिदुष्टं हृदयं प्रविश्य बुद्धिं स्मृतिं चाप्युपहन्ति शीघ्रम् ॥
अस्थानहास्यस्मितनृत्यगीतवागङ्गविक्षेपणरोदनानि ।
पारुष्यकार्श्यारुणवर्णता च जीर्णे बलं चानिलजस्य रूपम् ।

पित्तजमाह—**अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैश्चितं पित्तमुदीर्णवेगम् ।**
उन्मादमत्युग्रमनात्मकस्य हृदि स्थितं पूर्ववदाशु कुर्यात् ॥
अमर्षसंरम्भविनग्नभाव-सन्तर्जनाभिद्रवणौष्ण्यरोषाः ।
प्रच्छायशीतान्नजलाभिलाषाः पीता च भाः पित्तकृतस्य लिङ्गम् ॥

कफजमाह—**सम्पूरणैर्मन्दविचेष्टितस्य सोष्मा कफो मर्मणि सम्प्रवृद्धः ।**
बुद्धिं स्मृतिं चाप्युपहन्ति चित्तं प्रमोहयन्सञ्जनयेद्विकारम् ।
वाक्चेष्टितम् मन्दमरोचकश्च नारीविविक्तप्रियता च निद्रा ।
छर्दिश्च लाला च बलं च भुङ्क्ते नखादिशौक्ल्यं च कफात्मके स्यात् ॥

सन्निपातजमाह—**यः सन्निपातप्रभवो हि घोरः सर्वैः समस्तैः स तु हेतुभिः स्यात् ।**
सर्वाणि रूपाणि बिभर्त्ति तादृग्विरुद्धभैषज्यविधिर्विवर्ज्यः ॥

विषजमाह—**रक्तेक्षणो हतबलेन्द्रियभाः स दीनः-**
श्यावाननो विषकृतेन भवेद्विसंज्ञः ॥

मनोदुःखजमाह—

चौरैर्नरेन्द्रपुरुषररिभिस्तथाऽन्यैर्वित्रासितस्य धनबान्धवसङ्क्षयाद्वा ।
गाढं क्षते मनसि च प्रियया रिरंसोर्जायेत चोत्कटतरो मनसो विकारः ॥
चित्रं ब्रवीति च मनोऽनुगतं विसञ्ज्ञो गायत्यथो हसति रोदिति चापि मूढः ॥

उत्पन्न होते हैं, जिनके करने को वह तुला रहता है। अतः इसकी सब चेष्टाएँ विकृत हो अतिदुःख, अतिहर्ष, भय, शोक, ईप्सित पदार्थ की अप्राप्ति आदि से या किसी धुन में लग जाने से भी मन दूषित होकर मनुष्य पागल हो जाता है। इनके लक्षण भी कारण ही होते हैं ॥ ३७ ॥

भूतोन्मादभेदाः-**भूतोन्मादा विंशतिः स्युस्ते देवाद्दानवादपि ।**
गन्धर्वात्किन्नराद्यक्षात्पितृभ्यो गुरुशापतः ॥ ३८ ॥
प्रेताच्च गुह्यकाद् वृद्धात्सिद्धाद्भूतात्पिशाचतः ।
जलाधिदेवतायाश्च नागाच्च ब्रह्मराक्षसात् ।
राक्षसादपि कूष्माण्डात्कृत्यावेतालयोरपि ॥ ३९ ॥

भूतोन्माद(१) यानी भूत चढ़ने का उन्माद बीस तरह का होता है। १-देवोन्माद,

---

(१) देवादिकृतोन्मादस्य **अमर्त्यवाग्विक्रमवीर्यचेष्टो ज्ञानादिविज्ञानबलादियुक्तः।**
सामान्यलक्षणम्— **प्रकोपकालोऽनियतश्च यस्य देवादिजन्मा मनसो विकारः।**
देवोन्मादमाह—**सन्तुष्टः शुचिरतिदिव्यमाल्यगन्धो निस्तन्द्रो ह्यवितथसंस्कृतप्र**
तेजस्वी स्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति नरः स देवजुष्टः॥
असुरोन्मादमाह—**संस्वेदी द्विजगुरुदेवदोषवक्ता जिह्माक्षो विगतभयो विमार्गदृष्टिः।**
सन्तुष्टो न भवति चान्नपानजातैर्दुष्टात्मा भवति स देवशत्रुजुष्टः।
गन्धर्वोन्मादमाह—**हृष्टात्मा पुलिनवनान्तरोपसेवी स्वाचारः प्रियपरिगीतगन्धमा**
नृत्यन्वै प्रहसति चारु चाल्पशब्दं गन्धर्वग्रहपरिपीडितो मनु
यक्षोन्मादमाह—**ताम्राक्षः प्रियतनुरक्तवस्त्रधारी गम्भीरो द्रुतगतिरल्पवाक् सहि**
तेजस्वी वदति च किं ददामि कस्मै यो यक्षग्रहपरिपीडितो मनु

पितृग्रहोन्मादमाह—

प्रेतानां स दिशति संस्तरेषु पिण्डाञ् शान्तात्मा जलमपि चापसव्यवस्त्रः।
मांसेप्सुस्तिलगुडपायसाभिलाषी तद्भक्तो भवति पितृग्रहाऽभिजुष्टः ॥

सर्पोन्मादमाह—

यस्तूर्व्यां प्रसरति सर्पवत्कदा चित् सृक्किण्यौ विलिहति जिह्वया तथैव।
क्रोधालुर्घृतमधुदुग्धपायसेप्सुर्विज्ञेयो भवति भुजङ्गमेन जुष्टः ॥
राक्षसोन्मादमाह—**मांसासृक्विविधसुराविकारलिप्सुर्निर्लज्जो भृशमतिनिष्ठुरोऽति**
क्रोधालुर्विविधबलो निशाविहारी शौचद्विड् भवति स राक्षसैर्गृ
ब्रह्मराक्षसोन्मादमाह—**देवविप्रगुरुद्वेषी वेदवेदाङ्गनिन्दकः ।**
आत्मपीडाकरोऽहिंस्रो ब्रह्मराक्षससेवितः ॥
पिशाचोन्मादमाह—**उद्वस्त्रः कृशपरुषो विरुद्धलापी दुर्गन्धो भृशमशुचिस्तथाऽति**
बह्वाशी विजनवनान्तरोपसेवी व्याचेष्टन् भ्रमति रुदन् पिशाच

नवोन्माद, ३–गन्धर्वोन्माद, ४–किन्नरोन्माद, ५–यक्षोन्माद, ६–पितृग्रहोन्माद, ७–गुरुशापज-नितोन्माद, ८–प्रेतोन्माद, ९–गुह्यकोन्माद, १० वृद्धपुरुषों के क्रोध से, ११–सिद्ध पुरुषों के रोष से, १२–भूतोन्माद १३–पिशाचोन्माद, १४–जलदेवोन्माद, १५ सर्पोन्माद, १६–ब्रह्मराक्षसो-न्माद, १७–राक्षसोन्माद, १८–कुष्माण्डोन्माद, १९–कृत्योन्माद यानी अभिचार–जादू , टोना आदि से उत्पन्न, २०–वेतालोन्म.द, ये बीस हैं।

विमर्श—ये उपर्युक्त उन्माद ग्रहों के आवेश याने चित्त पर कब्जा करने से उत्पन्न होते हैं। जिस ग्रह से पुरुष उन्मत्त रहता है उसी स्वभाववाला हो जाता है तथा उसकी तरह चेष्टाएँ करता है। इनकी चिकित्सा मणि, मन्त्र, शान्ति, स्वस्त्ययन, होम, जप, बलि, मङ्गल, प्रणिपातादि है।

आधुनिक विज्ञानवादियों का मत है कि–मनुष्य के मन में जो असंख्य भाव भरे रहते हैं, उनमें से जो भाव किसी कारणवश प्रबल हो जाता है मनुष्य तद्रूप हो जाता है। दूसरे ढङ्ग से यह कहा जाता है कि मस्तिष्क के विभिन्नज्ञान-केन्द्रों में से किसी केन्द्र का अधिक उत्ते-जित होना इस तरह के उन्मादों का कारण है। पर आधुनिक **पाश्चात्त्य भूतवादी** (Spiriltualis) भी भूतों की अस्तित्व, तथा मनुष्य शरीर में उनके आवेश को मानते हैं। कुछ भी हो यह सर्वसम्मत है कि ये विकार मानसिक हैं एवं मन को प्राकृतिक स्थिति पर लाने से ही शान्त होते हैं ॥ ३८–३९ ॥

अपस्मारभेदाः—**अपस्मारश्चतुर्द्धा स्यात्समीरात्पित्ततस्तथा ।**
श्लेष्मणोऽपि तृतीयः स्याच्चतुर्थः सन्निपाततः ॥ ४० ॥

अप (१)स्मार रोग चार प्रकार का होता है। १–वातिक २–पैत्तिक, ३–श्लैष्मिक एवं ४–सान्निपातिक।

असाध्यलक्षणम्—

स्थूलाक्षो द्रुतमटनः सफेनलेही निद्रालुः पतति च कम्पते च योऽति ।
यश्चाद्रिद्विरदनगादिविच्युतः स्यात् सोऽसाध्यो भवति तथा त्रयोदशेऽब्दे ॥

देवादीनां ग्रहणकालाः-**देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि ।**
गन्धर्वाः प्रायशोऽष्टम्या यक्षाश्च प्रतिपद्यथ ॥
पितरः कृष्णपक्षे(१) च पञ्चम्यामपि चोरगाः ।
रक्षः पिशाचा (२)रात्रौ च चतुर्दश्यां विशन्ति हि ॥

ग्रहाः प्रविशन्तो न दृ-**दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा ।**
श्यन्ते, तत्र युक्तिः— **स्वमणिं भास्करांशुश्च यथा देहं च देहधृक् ॥**
विशन्ति च न दृश्यन्ते ग्रहास्तद्वच्छरीरिणाम् ॥

(१)अपस्मारस्य निदा-**चिन्ताशोकादिभिर्दोषाः क्रुद्धा हृत्स्रोतसि स्थिताः ।**
नपूर्विका सम्प्राप्तिः—**कृत्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्वते ॥**

---

(१) **पाठान्तरे—'पितृग्रहास्त्वमावास्याम्'** ।
(२) **'रक्षांसि रात्रौ पैशाचाश्चतुर्दश्यां विशन्ति हि'** ।

विमर्श—इसमें मनुष्य की स्मृति नष्ट हो जाती है और उसे अन्धकार में प्रवेश का तथा नाना प्रकार के प्राणियों का अपनी ओर दौड़ने का मिथ्या ज्ञान होता है जिससे घबड़ाकर गिर जाता है तथा मुख से फेन निकला करता है। बारह दिन, एक पक्ष या एक मास में।अथवा कम अधिक दिन में निश्चित समय पर ही इसका आक्रमण होता है दोषों की प्रबलता के अनुसार समय कभी कभी अनिश्चित भी होता है। दौरे के चले जाने पर मनुष्य प्रायः स्वस्थ हो जाता है, एवम् अपना सब काम धन्धा भी करता रहता है, जब तक दूसरा दौरा न आ जाय। यह दौरा कुछ मिनटों में ही चला जाता है ॥ ४० ॥

आमवातभेदाः—**चत्वारश्चामवाताः स्युर्वातपित्तकफैस्त्रिधा। चतुर्थः सन्निपातेन……**

आम(१)वात रोग चार तरह का होता है। १–वातिक २–पैत्तिक ३–श्लैष्मिक एवं ४–सन्निपातिक।

सामान्यं लक्षणम्—**तमःप्रवेशः संरम्भो दोषोद्रेकहतस्मृतेः।**
अपस्मार इति ज्ञेयो गदो घोरश्चतुर्विधः ॥

वातापस्मारमाह—**कम्पते सन्दशेद्दन्तान् फेनोद्वामी श्वसित्यपि।**
परुषारुणकृष्णानि पश्येद्रूपाणि चानिलात् ॥

पित्तापस्मारमाह—**पीतफेनाङ्गवक्त्राक्षः पीतासृग्रूपदर्शनः।**
सतृष्णोष्णानलव्याप्त-लोकदर्शी च पैत्तिकः ॥

कफजमाह—**शुक्लफेनाङ्गवक्त्राक्षः शीतहृष्टाङ्गजो गुरुः।**
पश्यञ् शुक्लानि रूपाणि श्लैष्मिको मुच्यतेऽचिरात् ॥

सन्निपातजमाह—**सर्वरेतैः समस्तैश्च लिङ्गैर्ज्ञेयस्त्रिदोषजः।**
अपस्मारः स चासाध्यो यः क्षीणस्यानवश्च यः ॥

असाध्यलक्षणम्—**प्रस्फुरन्तं च बहुशः क्षीणं प्रचलितभ्रुवम्।**
नेत्राभ्यां च विकुर्वाणमपस्मारो विनाशयेत् ॥

अपस्मारवेगदिनानि-यमानाह—**पक्षाद्वा द्वादशाहाद्वा मासाद्वा कुपिता मलाः।**
अपस्माराय कुर्वन्ति वेगं किञ्चिदथान्तरम् ॥
देवे वर्षत्यपि यथा भूमौ बीजानि कानि चित्।
शरदि प्रतिप्ररोहन्ति तथा व्याधिसमुद्भवः ॥

(१) आमवातनिदानम्-**विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च।**
स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्वतस्तथा ॥
वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति।
तेनात्यर्थमपक्वोऽसौ धमनीः प्रतिपद्यते ॥
वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः।
स्रोतांस्यभिस्पन्दयन्ति नानावर्णोऽतिपिच्छिलः ॥

विमर्श—आमदोष जब कफ के स्थान में वात प्रेरित होकर चला जाता है, तो वह धमनियों से सारे शरीर में फैल कर त्रिकस्थान तथा सन्धियों में शोथ उत्पन्न कर देता है अथवा शरीर को जकड़ देता है, उसे **आमवात** कहते हैं। अंगमर्द, अरुचि, प्यास, आलस्य, शरीर का भारीपन, ज्वर, अविपाक तथा शरीर में सूजन इसके **समान्य लक्षण** हैं। यह रोग आमदोष एवं वात से ही उत्पन्न होने से **आमवात** कहाजाता है, पर अन्य दोषों के संसर्ग भी इसमें होते हैं। अतः उल्बण के अनुसार वातादिज भेद किया गया है॥ ४१॥

शूलभेदाः—······**शूलान्यष्टौ बुधा जगुः। पृथग्दोषैस्त्रिधा द्वन्द्वभेदेन त्रिविधान्यपि ।**
आमेन सप्तमं प्रोक्तं सन्निपातेन चाष्टमम् ॥ ४२ ॥

शू(१)**ल रोग** आठ प्रकार का होता है। १–वातिक, २–पैत्तिक, ३–श्लैष्मिक, ४–वातपैत्तिक, ५–वातश्लैष्मिक तथा ६–पित्तश्लैष्मिक, ७–आमशूल एवं ८–सान्निपातिक शूल।

जनयत्यग्निदौर्बल्यं हृदयस्य च गौरवम् ।
व्याधीनामाश्रयो ह्येष आमसञ्ज्ञोऽतिदारुणः ॥
आमलक्षणम्—**अजीर्णाद्यो रसो जातः सञ्चितो हि क्रमेण वै ।**
आमसञ्ज्ञां स लभते शिरोगात्ररुजाकरः ॥
सामान्यं लक्षणम्—**युगपत्कुपितावेतौ त्रिकसन्धिप्रवेशकौ ।**
स्तब्धं च कुरुतो गात्रमामवातः स उच्यते ॥
विशेषलक्षणम्—**अङ्गमर्दोऽरुचिस्तृष्णा चालस्यं गौरवं ज्वरः ।**
अपाकः शून्यताङ्गानामामवातस्य लक्षणम् ॥
रूपमाह—**स कष्टः सर्वरोगाणां यदा प्रकुपितो भवेत् ।**
हस्तपादशिरोगुल्फ-त्रिकजानूरुसन्धिषु ॥
करोति सरुजं शोथं यत्र दोषः प्रपद्यते । स देशो रुज्यतेऽत्यर्थं व्याविद्ध इव वृश्चिकैः ॥
जनयेत्सोऽग्निदौर्बल्यं प्रसेकारुचि गौरवम् । उत्साहहानिर्वैरस्यं दाहं च बहुमूत्रताम् ॥
कुक्षौ कठिनतां शूलं तथा निद्राविपर्ययम् । तृट्छर्दिज्वरमूर्च्छाश्च हृद्ग्रहं विड्विबन्धताम् ॥
जाड्यान्त्रकूजनानाहकष्टांश्चान्यानुपद्रवान् ॥
पित्तादियुक्तस्य लक्षणम्—**पित्तात्सदाहरागं च सशूलं पवनानुगम् ।**
स्तिमितं गुरुकण्डूं च कफजुष्टं तमादिशेत् ॥
सर्वलक्षणसम्पन्नं सन्निपातं तमादिशेत् ॥
साध्यासाध्यमाह—**एकदोषानुगः साध्यो द्विदोषो याप्य उच्यते ।**
सर्वदेहचरः शोथः स कृच्छ्रः सान्निपातिकः ॥

(१)शूलशब्दस्य निरुक्तिः-**शूलनिर्घातवेदनाजनकत्वाच्छूलसञ्ज्ञा, यतः-**
शङ्कुस्फोटनवत्तस्य यस्मात्तीव्रा च वेदना । शूलासक्तस्य भवति तस्माच्छूलमिहोच्यते ॥

विमर्श—इस रोग में शूल से विद्धवत् वेदना होती है, अतः शूल नाम दिया ग। **वातजशूल का स्थान**-हृदय, पसवाड़े, पीठ, त्रिकसंधि तथा पेडू है। **पित्तजशूल का स्था** नाभि है तथा **कफजशूल** का स्थान आमाशय है। **सान्निपातिक शूल** सब दोषों के लक्षण होता है। **आमशूल** भी आमाशय में ही होता है तथा कफज शूल के समान लक्षणवाला है, पर इसमें **आमदोष** के लक्षण अधिक होते हैं। **द्विदोषजशूल**-दो दोषों के लक्षण होते हैं विशेष यह है-**कफवातिक शूल**-वस्ति, हृदय, पृष्ठ और पार्श्व में। **कफपै** शूल-हृदय और नाभि के मध्य देश में होते हैं तथा **वातपैत्तिक** शूल में ज्वर और दाह रूप से होते हैं ॥ ४२ ॥

वातजशूलमाह—

व्यायामयानादतिमैथुनाच्च-प्रजागराच्छीतजलातिपानात् ।
कलायमुद्गाढकिकोरदूषादत्यर्थरूक्षाध्यशनाभिघातात् ॥
कषायतिक्तातिविरूढजान्नविरुद्धवल्लूरकशुष्कशाकैः ।
(१)विट्च्छुक्रमूत्रानिलसन्निरोधाच्छोकोपवासादतिहास्यभाषात् ॥
वायुः प्रवृद्धो जनयेद्धि शूलं हृत्पृष्ठपार्श्वत्रिकबस्तिदेशे ।
जीर्णे प्रदोषे च घनागमे च शीते च कोपं समुपैति गाढम् ॥
मुहुर्मुहुश्चोपशमप्रकोपौ विण्मूत्रसंस्तम्भनतोदभेदैः ।
संस्वेदनाभ्यञ्जनमर्दनाद्यैः स्निग्धोष्णभोज्यैश्च शमं प्रयाति ॥

पित्तजमाह—क्षारातितीक्ष्णोष्णविदाहितैलनिष्पावपिण्याककुलत्थयूषैः ।
कट्वम्लसौवीरसुराविकारैः क्रोधानलायासरविप्रतापैः ॥
ग्राम्यातियोगादशनैर्विदग्धैः पित्तं प्रकुप्याथ करोति शूलम् ।
तृण्मोहदाहार्त्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमशोषयुक्तम् ।
मध्यंदिने कुप्यति चार्धरात्रे निदाघकाले जलदात्यये च ॥
शीते च शीतैः समुपैति शान्ति सुस्वादुशीतैरतिभोजनैश्च ॥

श्लैष्मिकमाह—आनूपवारिजकिलाटपयोविकारैर्मांसेक्षुपिष्टकृशरातिलशष्कुली
अन्यैर्बलासजनकैरपि भोजनैश्च श्लेष्मा प्रकोपमुपगम्य करोति शूलम् ।
हृल्लासकाससदनारुचिसम्प्रसेकैरामाशये स्तिमितकोष्ठशिरोगुरुत्वः ॥
भुक्ते सदैव हि रुजं कुरुतेऽतिमात्रं सूर्योदये च शिशिरे कुसुमागमे च ।

द्वन्द्वजमाह—द्विदोषलक्षणैरेतैर्विद्याच्छूलं द्विदोषजम् ।

सान्निपातिकमाह—सर्वेषु दोषेषु च सर्वलिङ्गं विद्याद् भिषक् सर्वभवं हि शूलम् ।
सुकष्टमेनं विषवज्रकल्पं विवर्जनीयं प्रवदन्ति तज्ज्ञाः ॥

---

(१) विड्वातेति पाठान्तरं वर्त्तते ।

परिणामशूलभेदाः—**परिणामभवं शूलमष्टधा परिकीर्त्तितम् ।**
मलैयः।शूलसंख्या स्यात्तैरेव परिणामजम् ॥ ४३ ॥

परिणा(१)मशूल भी आठ प्रकार का होता है। यह शूल का ही भेद मात्र है, अतः इसके वातादिक भेद भी शूल जैसा ही होता है।

विमर्श—पर इसमें विशेष भेद यह है कि–यह शूल भोजन के जीर्ण होने के समय में ही होता है। भोजन करने के पूर्व या जीर्ण होने के बाद नहीं होता ॥ ४३ ॥

अन्नद्रवजरत्पित्तशूले—**अन्नद्रवभवं शूलं जरत्पित्तभवं तथा । एकैकं गणितं सुज्ञैः…॥४४॥**

अन्न(२)द्रवशूल तथा **जरत्पित्तज** शूल को भी विज्ञ चिकित्सक गण अलग गिने हैं।

आमजशूलमाह—**आटोपहृल्लासवमीगुरुत्वस्तैमित्यकानाहकफप्रसेकैः ।**
कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमुदाहरन्ति ॥

दोषविशेषे देशविशेषमाह—**वातात्मकं वस्तिगतं वदन्ति पित्तात्मकं चापि वदन्ति नाभ्याम् ।**
हृत्पार्श्वकुक्षौ कफसन्निविष्टसर्वेषु देशेषु च सन्निपातात् ॥
बस्तौ,हृत्कटिपार्श्वेषु,स शूलः कफवातिकः ।
कुक्षौ हृन्नाभिमध्ये तु स शूलः कफपैत्तिकः । दाहज्वरकरो घोरो।विज्ञेयो वातपत्तिकः॥

(१) परिणामशूलनिदानम्—**स्वैर्निदानैः प्रकुपितो वायुः सन्निहितो यदा ।**
कफपित्ते समावृत्य शूलकारी भवेद् बली ॥

परिणामशूलस्य लक्षणम्—**भुक्ते जीर्यति यच्छूलं तदेव परिणामजम् ।**
तस्य लक्षणमप्येतत्समासेनाभिधीयते ।

वातिकमाह—**आध्मानाटोपविण्मूत्र-विबन्धारतिवेपनैः ।**
स्निग्धोष्णोपशमप्रायं वातिकं तद् वदेद्भिषक् ॥

पैत्तिकमाह—**तृष्णादाहारुचिस्वेद-कट्वम्ललवणोत्तरम् ।**
शूलं शीतशमप्रायं पैत्तिकं लक्षयेद् बुधः ॥

कफजमाह—**छर्दिहृल्लाससम्मोह-स्वल्परुग्दीर्घसन्तति ।**
कटुतिक्तोपशान्तं च ज्ञेयं तच्च कफात्मकम् ॥

द्वन्द्वजं सन्निपातजञ्चाह—**संसृष्टं लक्षणं बुद्ध्वा द्विदोषं परिकल्पयेत् ।**
त्रिदोषजमसाध्यं स्यात्क्षीणमांसबलानलम् ।
कफजसमानमामजपरिणामशूललिङ्गं ज्ञेयम् ॥

(२) अन्नद्रवशूललक्षणम्—**जीर्णे जीर्यत्यजीर्णे वा यच्छूलमुपजायते ।**
पथ्यापथ्यप्रयोगेण भोजनाभोजनेन च ॥
न।शमं याति नियमात सोऽन्नद्रव उदाहृतः ।

जरत्पित्तलक्षणम्—**अन्नद्रवाख्यशूलेषु न तावत्स्वास्थ्यमश्नुते ।**
वान्तमात्रे जरत्पित्तं शूलमाशु व्यपोहति ॥

विमर्श—अन्नद्रवशूल का कोई नियम नहीं होता; खाने पर, जीर्य्यमाण अवस्था में जीर्ण होने पर होता ही रहता है तथा पथ्यापथ्य से भी कोई फर्क नहीं आता। यह शूल बेकायदे होता है, उसी तरह बेकायदे से शान्त भी होता रहता है। पित्त के विदग्ध होने से **जरत्पित्तजशूल** होता है; इसका दूसरा नाम **अम्लशूल** है ॥ ४४ ॥

उदावर्त्तभेदाः—······**उदावर्त्तास्त्रयोदश। एकः क्षुन्निग्रहात्प्रोक्तस्तृष्णारोधाद् द्वितीयकः।**
निद्राघातात्तृतीयः स्याच्चतुर्थः श्वासनिग्रहात्।
छर्दिरोधात्पञ्चमः स्यात्षष्ठः क्षवथुनिग्रहात् ॥ ४६ ॥
जृम्भारोधात्सप्तमः स्यादुद्गारग्रहतोऽष्टमः।
नवमः स्यादश्रुरोधाद्दशमः शुक्रधारणात् ॥ ४७ ॥
मूत्ररोधान्मलस्यापि रोधाद्वातविनिग्रहात्।
उदावर्त्तास्त्रयश्चैते घोरोपद्रवकारकाः ॥ ४८ ॥

उदा(१)वर्त्त रोग तेरह प्रकार का होता है। **प्रथम—**भूख को रोकने से, द्वि

---

(१) उदावर्त्तनिदानम्—**वातविण्मूत्रजृम्भाऽश्रुक्षवोद्गारवमीन्द्रियैः।**
क्षुत्तृष्णोच्छ्वासनिद्राणां धृत्योदावर्त्तसम्भवः ॥
सामान्यलक्षणम्—**यत्रोर्ध्वं जायते वायोरावर्त्तः स चिकित्सकैः।**
उदावर्त्त इति प्रोक्तो व्याधिस्तत्रानिलः प्रभुः ॥
वातनिरोधजमाह—**वातमूत्रपुरीषाणां सङ्गाध्मानं क्लमो रुजा।**
जठरे वातजाश्चान्ये रोगाः स्युर्वातनिग्रहात् ॥
मलावरोधजमाह—**आटोपशूलौ परिकर्त्तिका च सङ्गः पुरीषस्य तथोर्ध्ववातः।**
पुरीषमास्यादथवा निरेति पुरीषवेगेऽभिहते नरस्य ॥
मूत्रावरोधजमाह—**वस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा।**
विनामो वङ्क्षणानाहः स्याल्लिङ्गं मूत्रनिग्रहे ॥
जृम्भाऽवरोधजमाह—**मन्यागलस्तम्भशिरोविकारा जृम्भोपघातात् पवनात्मकाः।**
तथाऽक्षिनासावदनामयाश्च भवन्ति तीव्राः सह कर्णरोगैः।
अश्रुरोधजमाह—**आनन्दजं वाऽप्यथ शोकजं वा नेत्रोदकं प्राप्तममुञ्चतो हि।**
शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन ॥
छिक्कानिरोधजमाह—**मन्यास्तम्भः शिरःशूलमर्दितार्द्धावभेदकौ।**
इन्द्रियाणां च दौर्बल्यं क्षवथोः स्याद्विधारणात् ॥
उद्गारनिरोधजमाह—**कण्ठास्यपूर्णत्वमतीव तोदः कूजश्च वायोरथवा प्रवृत्तिः।**
उद्गारवेगेऽभिहते भवन्ति घोरा विकाराः पवनप्रसूताः ॥
छर्दिरोधजमाह—**कण्डूकोठारुचिव्यङ्गशोफपाण्ड्वामयज्वराः।**
कुष्ठहृल्लासवीसर्पाश्छर्दिनिग्रहजा रुजः ॥

प्यास के रोकने से, **तृतीय**—निद्रा के रोकने से, **चतुर्थ**—सांस के रोकने से, **पञ्चम**—वमन के रोकने से, **छठा**—छींक के रोकने से, **सातवां**—जम्भाई के रोकनेसे, **आठवां**—डकार के रोकने से, **नवम**—आंसू के रोकने से, **दशम**—वीर्य्य के रोकने से, **ग्यारहवां**—मूत्र के रोकने से, **बारहवां**—मल के रोकने से और **तेरहवां**-अधोवायु के रोकने से, इसभांति तेरह तरह के **उदावर्त्त रोग** उत्पन्न होते हैं। जिनमें से अन्तिम तीन यानी मूत्र, मल और अधोवायु के रोकने से उत्पन्न उदावर्त्त तो घोर उपद्रव करने वाले होते हैं।

विमर्श—सार यह है कि उपर्युक्त क्षुधा आदि तेरह वेगों को नहीं रोकना चाहिये। यदि, प्रवर्त्तमान वेग को रोका जाय तो वायु उलट कर स्रोतों के मार्ग को भी दूषित कर देता है जिससे पुनः वेग प्रवर्त्तित नहीं होकर उसका वेग उलटा चलता है। इसी कारण इसका नाम भी **उदावर्त्त** है। इसमें सदा वात का शमन कर ठीक मार्ग पर चलना चाहिये ॥ ४५-४८ ॥

आनाहभेदौ—**आनाहो द्विविधो ज्ञेय एकः पक्वाशयोद्भवः ।**
आमाशयोद्भवश्चान्यः प्रत्यानाहः स कथ्यते ॥ ४९ ॥

आना(१)ह रोग दो प्रकार का होता है। **एक**—पक्वाशय में होता है जिसे **'आनाह'** कहते हैं **दूसरा**—आमाशय में होता है जिसे **'प्रत्यानाह'** कहते हैं। १-पक्वाशय में मल के जमा हो जाने से तथा प्रवर्त्तित न होने से पेट फूल जाता है, उसे **आनाह** कहते हैं। २-उसी तरह आम दोष के आमाशय में जमा हो जाने से तथा वमन-द्वारा या विरेचन द्वारा न निकलने से पेट फूल जाता है, इसे **प्रत्यानाह** कहते हैं। मल या आमदोष संचित होकर न निकल सकने के कारण मार्ग का रोध करने से वायु पेट को फुला कर **आनाह** या **प्रत्यानाह** उत्पन्न करता है। इनका आध्मान और प्रत्याध्मान से यही भेद है कि ये मल या आम के संचय से

शुक्रावरोधजमाह—**मूत्राशये वै गुदमुष्कयोश्च शोथो रुजा मूत्रविनिग्रहश्च ।**
शुक्राश्मरी तत्स्रवणं भवेच्च ते ते विकारा विहते च शुक्रे ॥

क्षुधानिरोधजमाह—**तन्द्राऽङ्गमर्दावरुचिः श्रमश्च क्षुधाऽभिघातात्कृशता च दृष्टेः ।**

तृषानिरोधजमाह—**कण्ठास्यशोषः श्रवणावरोधस्तृष्णाऽभिघाताद्धृदये व्यथा च ।**

श्वासनिरोधजमाह—**श्रान्तस्य निःश्वासविनिग्रहेण हृद्रोगमोहावथवाऽपि गुल्मः ।**

निद्रावरोधजमाह—
जृम्भाऽङ्गमर्दोऽक्षिशिरोऽभिजाड्यं निद्राऽभिघातादथवाऽपि तन्द्रा ।

(१) आनाहलक्षणम्—**आमं शकृद्वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन ।**
प्रवर्त्तमानं न यथास्वमेनं विकारमानाहमुदाहरन्ति ॥

पक्वाशयोद्भवमाह—**स्तम्भः कटीपृष्ठपुरीषमूत्रैः शूलोऽथ मूर्च्छा शकृतश्च वान्तिः ॥**
शोथश्च पक्वाशयजे भवन्ति तथाऽलसोक्तानि च लक्षणानि ॥

आमाशयोद्भव (प्रत्यानाह) माह—**तस्मिन्भवन्त्यामसमुद्भवे तु तृष्णाप्रतिश्यायशिरोविदाहाः ।**
आमाशये शूलमथो गुरुत्वं हृत्स्तम्भ उद्गारविघातनं च ॥

पेट फुलाते हैं।पर आध्मान और प्रत्याध्मान पक्वाशय अथवा आमाशय के वैगुण्य से सि
को ही रोक कर होते हैं। इसके सिवाय आनाहों में अनेक उपद्रव होते हैं जो आध्मान
होते। अतः पहचानने में वैद्य भूल न करें॥ ४९॥

उरोग्रहहृद्रोगयोर्भेदाः–**उरोग्रहस्तथा चैको हृद्रोगाः पञ्च कीर्त्तिताः।**
वातादिभिस्त्रयःप्रोक्ताश्चतुर्थः सन्निपाततः।पञ्चमः क्रिमिसञ्ज्ञ

उरो(१)**ग्रह** रोग एक ही प्रकार का होता है।

विमर्श—यह वातकफ से होता है। इसमें छाती जकड़ जाती है॥

(२)**हृद्रोग** पांच प्रकार का होता है। १–वातज, २–पित्तज, ३–कफज, ४–सन्नि
एवं ५–पांचवां कृमि से होता है।

विमर्श—वातादि दोष **रस** धातु को दूषित कर उसके साथ जब हृदय में पहुंचते हैं
हृद्रोग उत्पन्न करते हैं। **कृमिज हृद्रोग** आमाशय में उत्पन्न **हृदयाद** नामक कृमि से
है। इसके लक्षण कृमि रोग जैसे जानें। विशेष कर इसमें हृदय में भक्षण करने के
पीड़ा होती है, क्योंकि ये क्रिमि हृदय को भक्षण करते हैं॥ ५०॥

उदररोगभेदाः—···**तथाऽष्टावुदराणि चावातात्पित्तात्कफात्त्रीणि त्रिदोषेभ्यो जला**
प्लीह्नः क्षताद्बद्धगुदादष्टमं परिकीर्त्तितम्॥ ५१॥

उदर(३) **रोग** आठ प्रकार का होता है। १–वातोदर, २–पित्तोदर, ३–कफोदर, ४–

---

(१) उरोग्रहलक्षणम्—**सास्त्रं मांसं यकृत्प्लीह्नोः सद्योवृद्धिं यदा गतौ।**
उरोग्रहं तदा कुक्षौ कुरुतः कफमारुतौ॥

(२) हृद्रोगनिदानम्—**अत्युष्णगुर्वम्लकषायतिक्तश्रमाभिघाताध्यशनप्रसङ्गैः।**
सञ्चिन्तनैर्वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः॥

सम्प्राप्तिपूर्वकं लक्षणम्—**दूषयित्वा रसं दोषा विगुणा हृदयं गताः।**
हृदि बाधां प्रकुर्वन्ति हृद्रोगं तं प्रचक्षते॥

वातिकमाह—**आयम्यते मारुतजे हृदयं तुद्यते तथा।**
निर्मथ्यते दीर्यते च स्फोट्यते पाट्यतेऽपि च॥

पैत्तिकमाह—**तृष्णोष्मादाहचोषाः स्युः पैत्तिके हृदयक्लमः।**
धूमायनं च मूर्च्छा च स्वेदः शोषो मुखस्य च॥

कफजमाह—**गौरवं कफसंस्रावोऽरुचिः स्तम्भोऽग्निमार्दवम्।**
माधुर्यमपि चास्यस्य बलासावतते हृदि॥

सन्निपातजमाह—**विद्यात्त्रिदोषमप्येवं सर्वलिङ्गं हृदामयम्।**

क्रिमिजमाह—**उत्क्लेदः ष्ठीवनं तोदः शूलं हृल्लासकस्तमः।**
अरुचिः श्यावनेत्रत्वं शोथश्च क्रिमिजे भवेत्॥

(३) उदरनिदानम्—**रोगाः सर्वेऽपि मन्देऽग्नौ सुतरामुदराणि च।**

वातोदर, ५–जलोदर, ६–प्लीहोदर, ७–क्षतोदर और ८–बद्धगुदोदर।

अजीर्णान्मलिनैश्चान्नैर्जायन्ते मलसञ्चयात्॥

सम्प्राप्तिमाह—रुद्ध्वा स्वेदाम्बुवाहीनि दोषाः स्रोतांसि सञ्चिताः।
प्राणाग्न्यपानान् सन्दूष्य जनयन्त्युदरं नृणाम्॥

सामान्यलक्षणम्—आध्मानं गमनेऽशक्तिर्दौर्बल्यं दुर्बलाग्निता।
शोथः सदनमङ्गानां सङ्गो वातपुरीषयोः॥
दाहस्तन्द्रा च सर्वेषु जठरेषु भवन्ति हि।

वातोदरमाह—तत्र वातोदरे शोथः पाणिपान्नाभिकुक्षिषु।
कुक्षिपार्श्वोदरकटिपृष्ठरुक्पर्वभेदनम्॥
शुष्ककासोऽङ्गमर्दोऽधोगुरुता मलसङ्ग्रहः॥

श्यावारुणत्वगादित्वमकस्माद् वृद्धिह्रासवत्। सतोदभेदमुदरं तनुकृष्णशिराततम्। आध्मातदृतिवच्छब्दमाहतं प्रकरोति च। वायुश्चातिसरुक् शब्दो विचरेत्सर्वतो गतिः॥

पित्तोदरमाह—पित्तोदरे ज्वरो मूर्च्छा दाहस्तृट् कटुकास्यता।
भ्रमोऽतिसारः पीतत्वं त्वगादावुदरं हरित्॥

पीतताम्रशिरानद्धं सस्वेदं सोष्म दह्यते। धूमायते मृदुस्पर्शं क्षिप्रपाकं प्रदूयते॥

कफोदरमाह—श्लेष्मोदरेऽङ्गसदनं स्वापश्वयथुगौरवम्।
निद्रोत्क्लेशोऽरुचिः श्वासः कासः शुक्लत्वगादिता॥
उदरं स्तिमितं स्निग्धं शुक्लराजीततं महत्।
चिराभिवृद्धं कठिनं शीतस्पर्शं गुरु स्थिरम्॥

सन्निपातजमाह—स्त्रियोऽन्नपानं नखलोममूत्रविडार्त्तवैर्युक्तमसाधुवृत्ताः।
यस्मै प्रयच्छन्त्यरयो गरांश्च दुष्टाम्बुदूषीविषसेवनाद्वा॥
तेनाशु रक्तं कुपिताश्च दोषाः कुर्युः सुघोरं जठरं त्रिलिङ्गम्।
तच्छीतवाते भृशदुर्दिने च विशेषतः कुप्यति दह्यते च॥
स चातुरो मुह्यति हि प्रसक्तं पाण्डुः कृशः शुष्यति तृष्णया च।
दूष्योदरं कीर्त्तितमेतदेव प्लीहोदरं कीर्त्तयतो निबोध।

प्लीहोदरलक्षणम्—विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक्कफश्च।
प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ प्लीहोत्थमेतज्जठरं वदन्ति।
तद्वामपार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र।
मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः॥

प्लीहोदरस्यैव भेदं यकृ-सव्यान्यपार्श्वे यकृति प्रदुष्टे ज्ञेयं यकृद्दाल्युदरं तदेव।

दाल्युदरमाह— उदावर्त्तरुजानाहैस्तृण्मोहदहनज्वरैः।
गौरवारुचिकाठिन्यैर्विद्यात्तत्र मलान् क्रमात्॥

विमर्श—यह रोग उदर को आश्रय करके ही होता है, अतः उसकी **उदर रोग** सं
सन्निपातोदर को अन्यत्र **दूष्योदर** कहा गया है, क्योंकि यह आगन्तुक विष आदि
तुओं को दूषित कर उत्पन्न होता है यानी **दूषीविष** से उत्पन्न होता है। अतः **दूष्योदर** सं

जलोदर–दुष्ट–जलादि–पान से या स्नेहपान या अनुवासन, वमन, विरेचनादि के बाद
शीतल जल के पीने से उत्पन्न होता है। इसमें उदरस्थ शिराओं में जल का सञ्चय है
अतः **जलोदर** संज्ञा ठीक ही है। यह यद्यपि स्वतन्त्र भी होता है, पर अन्यान्य उदर
प्रतीकार के अभाव में **जलोदर** में परिणत हो जाते हैं। जलोदर भेषजसाध्य व्याधि न
इसके लिये शस्त्रक्रिया ही एक मात्र साधन है।

प्लीहोदर प्लीहा के बढ़ने से होता है। **प्लीहा**–वाम पार्श्व में है अतः प्लीहो
वामपार्श्व में ही वृद्धि को प्राप्त होता है। यहां **यकृद्दाल्युदर** को **श्रीशार्ङ्गधराचार्य** ने
होदर के ही अन्तर्गत कर दिया है, अतः पृथक् पाठ नहीं किया। कारण यह कि
लक्षण प्रायः एक से ही होते हैं, एवं चिकित्सा भी प्रायः एक ही सी है। फर्क सिर्फ इतना
यकृत् की वृद्धि प्रायः दक्षिण भाग में होती है, यद्यपि वाम भाग में भी यकृत् की वृद्धि है

क्षतोदर—अन्त्रों में अन्दर से अन्न-शल्यादि से या बाहर से प्रहार आदि से क्षत
होता है। इसे **परिस्राव्युदर** भी कहते हैं।

बद्धगुदोदर—गुदा के बद्ध या सङ्कुचित हो जाने से उत्पन्न होता है। गुदा के बद्ध
मल की प्रवृत्ति नहीं होती या होने पर भी कष्ट से और अत्यल्प। अतः पुरीष का सञ्च
से पेट, हृदय और नाभि के बीच में वृद्धि को प्राप्त होता है॥ ५१॥

बद्धगुदोदरमाह—**यस्यान्त्रमन्नैरुपलेपिभिर्वा बालाश्मभिर्वा पिहितं यथावत्**
सञ्चीयते तस्य मलः सदोषः शनैः शनैः सङ्करवच्च नाड्यां
निरुद्ध्यते तस्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पं
हृन्नाभिमध्ये परिवृद्धिमेति तस्योदरं बद्धगुदं वदन्ति॥

क्षतोदरमाह—**शल्यं तथाऽन्नोपहितं यदन्त्रं भुक्तं भिनत्त्यागतमन्यथा वा**
तस्मात् क्षतान्त्रात्सलिलप्रकाशः स्रावः स्रवेद् वै गुदतस्तु
नाभेरधश्चोदरमेति वृद्धिं निस्तुद्यते दाल्यति चातिमात्रं
एतत्परिस्राव्युदरं प्रदिष्टं दकोदरं कीर्त्तयतो निबोध॥

जलोदरमाह—**यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथवा नि**
पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दूष्यन्ति हि तद्वहा
स्नेहोपलिप्तेष्वथवाऽपि तेषु दकोदरं पूर्ववदभ्युपैति।
स्निग्धं महत्तत्परिवृद्धनाभि समाततं पूर्ण मिवाम्बुना च।
यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरं तत्

गुल्मभेदाः—गुल्मास्त्वष्टौ समाख्याता वातपित्तकफैस्त्रयः ॥ ६२ ॥
द्वन्द्वभेदास्त्रयः प्रोक्ताः सप्तमः सन्निपाततः। रक्तादष्टमकः ख्यातः ... ६३

गुल्मरोग(१) आठ प्रकार का होता है। १–वातिक गुल्म, २–पैत्तिक गुल्म, ३–श्लैष्मिक गुल्म, ४–वातपैत्तिक गुल्म, ५–वातश्लैष्मिक गुल्म, ६–पित्तश्लैष्मिक गुल्म, ७–सान्निपातिक गुल्म और ८–रक्तगुल्म।

---

(१) गुल्मनिदानम्—दुष्टा वातादयोऽत्यर्थं मिथ्याऽऽहारविहारतः।
कुर्वन्ति ह्यष्टधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ॥

सामान्यलक्षणम्—हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदि वाऽचलः।
वृत्तश्चयापचयवान् स गुल्म इति कीर्त्तितः ॥

निदानपूर्वकं वातिकलक्षणम्—रूक्षान्नपानं विषमातिमात्रं विचेष्टनं वेगविनिग्रहश्च।
शोकोऽभिघातोऽतिमलक्षयश्च निरन्नता चानिलगुल्महेतुः ॥
यः स्थानसंस्थानरुजाविकल्पं विड्वातसङ्गं गलवक्त्रशोषम्।
श्यावारुणत्वं शिशिरज्वरं च हृत्कुक्षिपार्श्वांसशिरोरुजं च ॥
करोति जीर्णेऽत्यधिकं प्रकोपं भुक्ते मृदुत्वं समुपैति यश्च।
वातात्स गुल्मो न च तत्र रूक्षं कषायतिक्तं कटु चोपशेते ॥

निदानपूर्वकं पैत्तिकलक्षणम्—कट्वम्ललतीक्ष्णोष्णविदाहिरूक्षक्रोधातिमद्यार्कहुताशसेवा।
आमे विघातो रुधिरं च दुष्टं पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥
ज्वरः पिपासा सदनाङ्गरागः शूलं महज्जीर्यति भोजने च ॥
स्वेदो विदाहो व्रणवच्च गुल्मः स्पर्शासहः पैत्तिकगुल्मरूपम्।

श्लैष्मिक-द्वन्द्वज-सान्निपातिकलक्षणानि—शीतं गुरु स्निग्धमचेष्टनं च सम्पूरणं प्रस्वपनं दिवा च।
गुल्मस्य हेतुः कफसम्भवस्य सर्वस्तु दुष्टो निचयात्मकस्य ॥
स्तैमित्यशीतज्वरगात्रसादहृल्लासकासारुचिगौरवाणि।
शैत्यं रुगल्पा कठिनोन्नतत्वं गुल्मस्य रूपाणि कफात्मकस्य ॥
निमित्तरूपाण्युपलक्ष्य गुल्मे द्विदोषजे दोषबलाबलं च।
व्यामिश्रलिङ्गानपरांश्च गुल्मांस्त्रीनादिशेदौषधकल्पनार्थम् ॥
महारुजं दाहपरीतमश्मवद् घनोन्नतं शीघ्रविदाहि दारुणम्।
मनःशरीराग्निबलापहारिणं त्रिदोषजं गुल्ममसाध्यमादिशेत्।

रक्तगुल्मस्य लक्षणम्—नवप्रसूताऽहितभोजना या या चामगर्भं विसृजेदृतौ वा।
वायुर्हि तस्याः परिगृह्य रक्तं करोति गुल्मं सरुजं सदाहम्।
पैत्तस्य लिङ्गेन समानलिङ्गं विशेषणं चाप्यपरं निबोध ॥
यः स्पन्दते पिण्डित एव नाङ्गैश्चिरात्सशूलः समगर्भलिङ्गः।
स रौधिरः स्त्रीभव एव गुल्मो मासे व्यतीते दशमे चिकित्स्यः ॥

विमर्श—वातादि दोष दूषित होकर हृदय और नाभि के बीच भाग में गोल ग्रं उत्पन्न करते हैं। यह गाँठ सञ्चरण शील या स्थिर तथा चय और अपचय वाली होती है को **गुल्म** कहते हैं। इसके **आश्रय स्थान** पांच हैं–हृदय, नाभि, दोनों पसवाड़े तथा **वस्ति** कहने से बस्तिगह्वरस्थ गर्भाशय का भी ग्रहण होता है जिसमें रक्तगुल्म उत्पन्न है। अन्यत्र निदान—ग्रन्थों में द्वन्द्वभेदों को छोड़ कर सिर्फ पांच गुल्म ही कहे गये यहां आचार्य ने **चिकित्सा ग्रन्थ** के अनुरोध से ही चिकित्सा–भेदार्थ द्विदोषज गुल्मों पृथक् पाठ दिया है।

रक्तगुल्म सिर्फ स्त्रियों को ही होता है जो **प्रदुष्ट आर्त्तव** से उत्पन्न होता है। कु चार्यों का मत है कि अन्य धातुरूप रक्त से भी **रक्तगुल्म** उत्पन्न होता है जो स्त्री-पुरु को ही होता है। बाह्य या आभ्यन्तर आघात से किसी आशय के अन्दर यदि रक्तस्राव हो और वह ऊर्ध्व मार्ग से या अधोमार्ग से न निकाला जाय।तो जम कर।वातकर्तृत्व होने से गुल्म में परिणत हो जाता है। यदि **पित्त से** पाचित होता है तो पूयोत्पत्ति हो यह कदाचित् ही होता है। रक्तगुल्म स्त्रियों का ही देखने को मिलता है। उसके लक्ष लक्षण से प्रायः समान होने से उसके निर्णय में सावधान होना चाहिये ॥ ५२–५३॥

मूत्राघातभेदाः—···**मूत्राघातास्त्रयोदश। वातकुण्डलिका पूर्वा वाताष्ठीला त**
वातबस्तिस्तृतीयः स्यान्मूत्रातीतश्चतुर्थकः ॥ ५४ ॥
पञ्चमं मूत्रजठरं षष्ठो मूत्रक्षयः स्मृतः। मूत्रोत्सर्गः सप्तमः स्यान्मूत्रग्रन्थिस्तथाऽ
मूत्रशुक्रं तु नवमं विड्घातो दशमः स्मृतः। मूत्रसादश्चोष्णवातो बस्तिकुण्डलिका
त्रयोऽप्येते मूत्रघाताः पृथग्घोराः प्रकीर्त्तिताः ॥ ५६ ॥

मूत्राघात(१) रोग तेरह प्रकार का होता है। १–वातकुण्डलिका, २–वाताष्ठीला, ३ वस्ति, ४–मूत्रातीत, ५–मूत्रजठर, ६–मूत्रक्षय, ७–मूत्रोत्सर्ग, ८–मूत्रग्रन्थि, ९–मूत्रशुक्र, १ ड्विघात, ११–मूत्रसाद, १२ उष्णवात तथा १३–वस्तिकुण्डलिका। इन तेरहों मूत्राघातों सादा, उष्णवात और बस्तिकुण्डलिका अत्यन्त कष्टदायक होते हैं।

आर्त्तवजन्य गुल्म लक्षणम्-**आर्त्तवादपि गुल्मः स्यात् स तु स्त्रीणां प्रजायते।**
अन्यस्त्वसृग्भवः पुंसां तथा स्त्रीणां प्रजायते ॥
गुल्मस्थानम्—**तस्य पञ्चविधं स्थानं पार्श्वे हृन्नाभिवस्तयः।**
(१)मूत्राघातानाह—**जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश।**
प्रायो मूत्रविघाताद्यैर्वातकुण्डलिकाऽऽदयः ॥
वातकुण्डलिकालक्षणम्-**रौक्ष्याद् वेगविघाताद् वा वायुर्वस्तौ सवेदनः।**
मूत्रमाविश्य चरति विगुणः कुण्डलीकृतः ॥
मूत्रमल्पाल्पमथवा सरुजं सम्प्रवर्त्तते।
वातकुण्डलिकां तां तु व्याधिं विद्यात सुदारुणम् ॥

विमर्श—इनके लक्षण प्रायः नाम से ही जाने जा सकते हैं, अतः यहां विस्तार भय से नहीं लिखा गया। आजकल के कितने आयुर्वेद को जबरदस्ती अमार्ग से ही आधुनिकता में खींच लाने वाले वैद्य **उष्णवात** को **सुजाक** में अवतारित करते हैं। यह मत सुज्ञसम्मत न होने से अशुद्ध और प्रामादिक है। असल में **सुजाक** का मूत्र के साथ कोई सम्बन्ध नहीं होता। यह आगन्तुज ही होता है ॥ ५४–५६ ॥

अष्ठीलालक्षणम्—**आध्मापयन् बस्तिगुदं रुद्ध्वा वायुश्चलोन्नताम् ।**
कुर्यात्तीव्रार्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीम् ॥

वातबस्तिलक्षणम्—**वेगं विधारयेद् यस्तु मूत्रस्याकुशलो नरः ।**
निरुणद्धि मुखं तस्य बस्तेर्बस्तिगतोऽनिलः ॥
मूत्रसङ्गो भवेत्तेन बस्तिकुक्षिनिपीडितः ।
वातबस्तिः स विज्ञेयो व्याधिः कृच्छ्रप्रसाधनः ॥

मूत्रातीतलक्षणम्—**चिरं धारयतो मूत्रं त्वरया न प्रवर्त्तते ।**
मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते ॥

मूत्रजठरमाह—**मूत्रस्य वेगेऽभिहते तदुदावर्त्तहेतुतः ।**
अपानः कुपितो वायुरुदरं पूरयेद् भृशम् ॥
नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनम् । तन्मूत्रजठरं विद्यादधोबस्तिनिरोधनम् ॥

मूत्रक्षयमाह—**रूक्षस्य क्लान्तदेहस्य बस्तिस्थौ पित्तमारुतौ ।**
मूत्रक्षयं सरुग्दाहं जनयेत्तां तदाह्वयम् ॥

मूत्रोत्सङ्गमाह—**बस्तौ वाऽप्यथवा नाले मणौ वा यस्य देहिनः ।**
मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः ॥
स्रवेच्छनरल्पमल्पं सरुजं वाऽथ नीरुजम् ।
विगुणानिलजो व्याधिः स मूत्रोत्सङ्गसंज्ञितः ॥

मूत्रग्रन्थिमाह—**अन्तर्बस्तिमुखे वृत्तः स्थिरोऽल्पः सहसा भवेत् ।**
अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रग्रन्थिः स उच्यते ॥

मूत्रशुक्रमाह—**मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतम् ।**
स्थानाच्च्युतं मूत्रयतः प्राक् पश्चाद् वा प्रवर्त्तते ॥
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते ।

विड्विघातमाह—**रूक्षान्नभुग्दुर्बलयोर्वातेनाधोकृतं शकृत् ।**
मूत्रस्रोतोऽनुपद्येत विट्संसृष्टं तदा नरः ।
विड्गन्धं मूत्रयेत् कृच्छ्राद्विड्विघातं तमादिशेत् ॥

मूत्रसादमाह—**पित्तं कफो वा द्वौ वाऽपि संहन्येतेऽनिलेन चेत् ।**
कृच्छ्रान्मूत्रं तदा पीतं रक्तं श्वेतं घनं सृजेत् ॥

मूत्रकृच्छ्रभेदाः—मूत्रकृच्छ्राणि चाष्टौ स्युर्वातपित्तकफैस्त्रिधा ॥ ५७ ॥
सन्निपाताच्चतुर्थं स्याच्छुक्रकृच्छ्रं च पञ्चमम् ।
विट्कृच्छ्रं षष्ठमाख्यातं घातकृच्छ्रं च सप्तमम् ।
अष्टमं चाश्मरीकृच्छ्रम्………… ॥ ५८ ॥

(१)मूत्रकृच्छ्र रोग आठ प्रकार का होता है। १–वातज, २–पित्तज, ३ कफज, ४–सन्नि-पातज, ५–शुक्रकृच्छ्र, ६–विट्कृच्छ्र ७–घातकृच्छ्र और ८–अश्मरीकृच्छ्र।

सदाहं रोचनाशङ्खचूर्णवर्णं भवेच्च तत् ।
शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति तम् ॥

उष्णवातमाह—व्यायामाध्वातपैः पित्तं बस्तिं प्राप्यानिलान्वितम् ।
बस्तिं मेढ्रं गुदं चैव प्रदहत् स्रावयेदधः ॥

मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा । कृच्छ्रात्पुनः पुनर्जन्तोरुष्णवातं तमादिशे

वस्तिकुण्डलमाह—द्रुताध्वलङ्घनायासैरभिघातात्प्रपीडनात् ।
स्वस्थानाद् वस्तिरुद्वृत्तः स्थूलस्तिष्ठति गर्भवत् ॥

शूलस्पन्दनदाहार्त्तो बिन्दुं बिन्दुं स्रवत्यपि । पीडितस्तु सृजेद्धारां संस्तम्भोद्वेष्टना
बस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमम् । पवनप्रबलं प्रायो दुर्निवारोऽल्पबुद्धि

इतरदोषानुवन्धेन लक्ष-तस्मिन् पित्तान्विते दाहः शूलं मूत्रविवर्णता ।
णम्—श्लेष्मणा गौरवं शोथः स्निग्धं मूत्रं घनं सितम् ॥
श्लेष्मरुद्धविलो बस्तिः पित्तोदीर्णो न सिद्ध्यति ।
अविभ्रान्तबिलः साध्यो न च यः कुण्डलीकृतः ॥
स्याद् बस्तौ कुण्डलीभूते तृण्मोहः श्वास एव च ॥

(१) मूत्रकृच्छ्रनिदा-व्यायामतीक्ष्णौषधरूक्षमद्यप्रसङ्गनृत्यद्रुतपृष्ठयानात् ।
नम्— आनूपमत्स्याध्यशनादजीर्णात्स्युर्मूत्रकृच्छ्राणि नृणां तथा
सम्प्राप्तिपूर्वकं वातजा-पृथङ्मलाः स्वैः कुपिता निदानैः सर्वेऽथवा कोपमुपेत्य
दिभेदेन लक्षणम्— मूत्रस्य मार्गं परिपीडयन्ति यदा तदा मूत्रयतीह कृच्छ्रा
तीव्रार्त्तिरुग्वङ्क्षणबस्तिमेढ्रे स्वल्पं मुहुर्मूत्रयतीह वाता
पीतं सरक्तं सरुजं सदाहं कृच्छ्रं मुहुर्मूत्रयतीह पित्तात् ॥
बस्तेः सलिङ्गस्य गुरुत्वशोथौ मूत्र सकृच्छ्रं कफमूत्रकृच्छ्रे
सर्वाणि रूपाणि च सन्निपाताद्भवन्ति तत्कृच्छ्रतमं हि

शल्यजमाह—मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु वा ।
मूत्रकृच्छ्रं तदाघाताज्जायते भृशदारुणम् । वातकृच्छ्रेण तुल्यानि तस्य लिङ्गानि

पुरीषजमाह—शकृतस्तु प्रतीघाताद्वायुर्विगुणतां गतः ।
आध्मानं वातशूलं च मूत्रसङ्गं करोति च ॥

विमर्श—ये आठ प्रकार के **मूत्रकृच्छ्** स्वतन्त्र तथा उपसर्ग रूप में भी होते हैं, यथा—**सुजाक** और **निरुद्धप्रकश** रोगों में। "मूत्राघात और "**मूत्रकृच्छ्**" दोनों ही **मूत्रसंस्थान** के रोग हैं। तथा उनके कारणादि भी प्रायः एक से हैं, यथा—मूत्रशुक्र, शुक्रकृच्छ्र, विड्घात-विट्कृच्छ्र आदि, अतः इन दोनों का भेद करना व्यर्थ है" ऐसी शङ्का प्रायः की जाती है। पर इनका भेद स्थानादि-भेद से तथा चिकित्साभेदार्थ करना नितान्त आवश्यक है। इनका भेद तो नाम से ही स्पष्ट हो जाता है। **मूत्राघात**—मूत्र की अभिनिर्वृत्ति में **घात** याने बाधा होना है तथा **मूत्रकृच्छ्** सिर्फ मूत्र के निकलने में कष्ट होना है। **मूत्राघात रोग**—मूत्र निर्माण करने वाले यन्त्र वृक्कद्वय, मूत्रवहप्रणालीद्वय तथा वस्ति के विकृत होने से यानी अपनी क्रिया में आघात होने से उत्पन्न होते हैं। पर मूत्रकृच्छ्र रोग सिर्फ मूत्र-प्रसेक मार्ग का रोग है। दोषों या आगन्तुक कारणों से मूत्रमार्ग का अवरोध या सङ्कोच होने से मूत्र के निकलने में कठिनाई होती है। यही **मूत्रकृच्छ्** है। **मूत्राघात** रोग में प्रायः मूत्र की प्रवृत्ति नहीं होती, पर मूत्रकृच्छ्र में प्रवृत्ति तो होती है किन्तु निकलने में कष्ट होता है। **सुजाक** में मूत्रमार्ग के घाव में पूय के जम जाने से मूत्रमार्ग रुक जाता है अतः मूत्र के निकलने में भयङ्कर पीडा होती है। यह भी **मूत्रकृच्छ्** ही है, पर इसे हम उपर्युक्त आठ मूत्रकृच्छ्रों में नहीं गिन सकते अथवा इसे नवम **मूत्रकृच्छ्** भी नहीं कह सकते। यह **सुजाक** का एक लक्षण या उपद्रव ही हो सकता है पृथक् रोग नहीं। क्योंकि यह गौण और सुजाक का अनुबन्ध है। उपद्रव लक्षण यथा—

"**व्याधेरुपरि यो व्याधिः भवत्युत्तरकालजः। उपक्रमाविरोधी च स उपद्रवसंज्ञितः॥**" इति।

अतः यह उपद्रव ही है। इसी तरह **निरुद्धप्रकश** में भी मणि के अति पीडित होने से प्रसेकद्वार सङ्कुचित होकर **मूत्रकृच्छ्** होता है। यह भी उपद्रव या लक्षण ही है, पृथक् रोग नहीं॥ ५७-५८॥

अश्मरीभेदाः—"'**चतुर्द्धा चाश्मरी मता। वातात्पित्तात्कफाच्छुक्रात्**"' ॥ ५९॥

अश्मरी(१) यानी पथरी रोग चार प्रकार का होता है। १-वातज, २-पित्तज, ३-कफज और ४-शुक्राश्मरी।

शुक्रजमाह—**शुक्रदोषैरुपहते मूत्रमार्गे विधाविते।**
स शुक्रं मेहयेत्कृच्छ्राद्वस्तिमेहनशूलवान्॥

अश्मरीजन्यमाह—**अश्मरीहेतुकं चापि मूत्रकृच्छ्रमुदाहृतम्॥**

(१) अश्मरीनिदानम्—**वातपित्तकफैस्तिस्रश्चतुर्थी शुक्रजा परा।**
प्रायः श्लेष्माश्रयाः सर्वा अश्मर्यः स्युर्यमोपमाः।

सम्प्राप्तिमाह—**विशोषयेद् बस्तिगतं सशुक्रं मूत्रं सपित्तं पवनः कफं वा।**
यदा तदाऽश्मर्युपजायते च क्रमेण पित्तेष्विव रोचना गोः॥

अनेकदोषाश्रयत्वम्—**नैकदोषाश्रयाः सर्वा अश्मर्यः पूर्वलक्षणम्॥**
बस्त्याध्मानं तदासन्नदेशेषु परितोऽतिरुक्।
मूत्रे बस्तसगन्धत्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः॥

विमर्श—इसमें सान्निपातिक अश्मरी नहीं कही गई क्योंकि सब अश्मरी ही सान्नि होती है। दोषों के उल्वण अनुसार व्यपदेश है; पूर्वोक्त तीन अश्मरी स्त्री और पुरुष दोनों है तथा प्रायः लड़कों में ही होती है। यदि ये बड़ों को होती है तो निकालने में होती है। शुक्राश्मरी बालक और स्त्री को नहीं होती। यह बड़े लोगों में ही शुक्रवेग को धारण करने से उत्पन्न होती है ॥ ५९ ॥

कफजमेहभेदाः— **इक्षुमेहः सुरामेहः पिष्टमेहश्च सान्द्रकः ।**
शुक्रमेहोदकाख्यौ च लालामेहश्च शीतकः ॥
सिकताख्यः शनैर्मेहो दशैते कफसम्भवाः ॥ ६० ॥

प्रमेह(१) बीस प्रकार का होता है। १–इक्षुमेह, २–सुरामेह, ३–पिष्टमेह, ४–

सामान्यलक्षणम्—**सामान्यलिङ्गं रुङ् नाभिसेवनीबस्तिमूर्द्धसु ।**
विशीर्णधारं मूत्रं स्यात्तया मार्गे निरोधिते ॥
तद्व्यपायात्सुखं मेहेदच्छगोमेदकोपमम् ।
तत्संक्षोभात्क्षते सास्रमायासाच्चातिरुग्भवेत् ॥

वाताश्मरीलक्षणम्—**तत्र वाताद् भृशं चार्त्तो दन्तान् खादति वेपते ।**
मेहनं नाभिं पीडयत्यनिशं क्वणन् ॥
सानिलं मुञ्चति शकृन्मुहुर्मेहति बिन्दुशः ।
श्यावारुणाऽश्मरी चास्या स्याच्चिता कण्टकैरिव ॥

पित्ताश्मरीलक्षणम्—**पित्तेन दह्यते बस्तिः पच्यमान इवोष्मवान् ।**
भल्लातकास्थिसंस्थाना रक्ता पीताऽसिताऽश्मरी ॥

कफजामाह—**बस्तिर्निस्तुद्यत इव श्लेष्मणा शीतलो गुरुः ।**
अश्मरी महती श्लक्ष्णा मधुवर्णाऽथवा सिता ॥
एता भवन्ति बालानां तेषामेव च भूयसा ।
आश्रयोपचयाल्पत्वाद् ग्रहणाहरणे सुखाः ॥

शुक्राश्मरीमाह—**शुक्राश्मरी तु महतां जायते शुक्रधारणात् ।**
स्थानाच्च्युतममुक्तं हि मुष्कयोरन्तरेऽनिलः ॥
शोषयत्युपसङ्गृह्य शुक्रं तच्छुक्रमश्मरी । बस्तिरुक्कृच्छ्रमूत्रत्वमुष्कश्वयथुकारि
तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते ॥
पीडिते त्ववकाशेऽस्मिन्नश्मर्येव च शर्करा ।
अणुशो वायुना भिन्ना सा त्वस्मिन्ननुलोमगे ॥
निरेति सह मूत्रेण प्रतिलोमे विबध्यते । मूत्रस्रोतः प्रवृत्ता सा सक्ता कुर्यादुपद्रवा
दौर्बल्यं सदनं कार्श्यं कुक्षिमूलमथारुचिम् ।
पाण्डुत्वमुष्णवातं च तृष्णां हृत्पीडनं वमिम् ॥

(१) प्रमेहनिदानम्—**आस्यासुखं स्वप्नसुखं दधीनि ग्राम्यौदकानूपरसाः पयांसि**

५-शुक्रमेह, ५-उदकमेह, ७-लालामेह, ८-शीतमेह, ९-सिकतामेह और १०-शनैर्मेह। ये १० प्रमेह कफज होते हैं ।

नवान्नपानं गुडवैकृतं च प्रमेहहेतुः कफकृच्च सर्वम् ॥

सम्प्राप्तिमाह—साध्य- मेदश्च मांसं च शरीरजं च क्लेदं कफो वस्तिगतं प्रदूष्य ।

त्वादिकमपि— करोति मेहान्समुदीर्णमुष्णैस्तानेव पित्तं परिदूष्य चापि ॥

क्षीणेषु दोषेष्ववकृष्य धातून् सन्दूष्य मेहान्कुरुतेऽनिलश्च ।

साध्याः कफोत्था दश पित्तजाः षड् याप्या न साध्याः पवनाच्चतुष्काः ॥

समक्रियत्वाद्विषमक्रियत्वान्महात्ययत्वाच्च यथाक्रमं ते ॥

पूर्वरूपमाह—दन्तादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः ।

दाहश्चिक्कणता देहे तृट्स्वाद्वास्ये च जायते ॥

सामान्यलक्षणम्—सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता ।

दोषदूष्यविशेषेऽपि तत्संयोगविशेषतः ॥

मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते ॥

श्लेष्मजानां लक्षणानि-अच्छं बहुसितं शीतं निर्गन्धमुदकोपमम् ॥

मेहत्युदकमेहेन किञ्चिदाविलपिच्छिलम् ॥

इक्षोरसमिवात्यर्थं मधुरं चेक्षुमेहतः । सान्द्रीभवेत्पर्युषितं सान्द्रमेहेन मेहति ॥

सुरामेही सुरातुल्यमुपर्यच्छमधो घनम् । संहृष्टरोमाः पिष्टेन पिष्टवद् बहुलं सितम् ॥

शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति। मूत्राणून्सिकतामेही सिकतारूपिणो मलान् ॥

शीतमेही सुबहुशो मधुरं भृशशीतलम् । शनैः शनैः शनैर्मेही मन्दं मन्दं प्रमेहति ॥

लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् ॥

पित्तजानाह—गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोवत् ।

नीलमेहेन नीलाभं कालमेही मषीनिभम् ॥

हारिद्रमेही कटुकं हरिद्रासन्निभं दहत् । विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् ॥

विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः ।

वातजानाह—वसामेही वसामिश्रं वसाभं मूत्रयेन्मुहुः ।

मज्जाभं मज्जमिश्रं वा मज्जामेही मुहुर्मुहुः ॥

कषायं मधुरं रूक्षं क्षौद्रं मेहेन मेहति । हस्ती मत्त इवाजस्रं मूत्रं वेगविवर्जितम् ॥

सलसीकं विबद्धं च हस्तिमेही प्रमेहति ॥

कफजानामुपद्रवाः—अविपाकोऽरुचिश्छर्दिर्निद्रा कासः सपीनसः ।

उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् ॥

पित्तजानामुपद्रवाः—बस्तिमेहनयोः शूलं मुष्कावदरणं ज्वरः ।

दाहस्तृष्णाऽम्लिका मूर्च्छा विड्भेदः पित्तजन्मनाम् ॥

विमर्श—इसमें **इक्षुमेह** में पेशाव गन्धवर्णादि में ईख के रस के तुल्य होता है। सुरामेह में मूत्र, सुरा यानी विना चुवाया मद्य जैसा होता है। मूत्र को स्थिर करने से नीचे सा भाग **किण्व** जैसा बैठ जाता है और ऊपर **सुरामण्ड** सा स्वच्छभाग होता है। पिष्टमेह में पेशाव के साथ चावलों की पिष्टी सी आती है। **सान्द्रमेह** में पेशाव को रात में रख सुवह सान्द्र यानीघन हो जाता है। शुक्रमेह में मूत्र के साथ शुक्र मिला हुवा रहता है। उदक मेह में मूत्र स्वच्छ जल जैसा स्वच्छ व निर्गन्ध होता है। **लालामेह** में मूत्र तन्तुल होता है। **शीतमेह** में मूत्र शीत और अधिक परिमाण में आता है, पेशाव करते रोगी शीत से कांप जाता है। **सिकतामेह** में पेशाव के साथ बालू आती है। **शनैर्मेह** में मूत्र धीरे एवम् अल्प मात्रा में आता है। ये दस प्रमेह कफ दोष से होते हैं तथा सुखसाध्य भी हैं।

पित्तजहभेदाः—**मञ्जिष्ठाख्यो हरिद्राख्यो नीलमेहश्च रक्तकः।**
कृष्णमेहः क्षारमेहः षडेते पित्तसम्भवाः॥ ६१॥

१–मञ्जिष्ठामेह, १–हरिद्रामेह, ३–नीलमेह, ४–रक्तमेह, ५–कृष्णमेह और ६–क्षारमेह ये ६ प्रमेह पित्तज हैं।

विमर्श—इनके लक्षण भी नामानुसार वर्णवाले मूत्र होते हैं। ये छः प्रमेह पित्त से उत्पन्न होते हैं एवं कष्टसाध्य या याप्य हैं॥ ६१॥

वातकमेहभेदाः—**हस्तिमेहो वसामेहो मज्जामेहो मधुप्रभः॥**
चत्वारो वातजा मेहा इति मेहाश्च विंशतिः॥ ६२॥

१–हस्तिमेह, २–वसामेह, ३–मज्जामेह और ४–मधुमेह। ये ४ प्रमेह वातज हैं। इस भांति ये २० प्रकार के प्रमेह हुये।

विमर्श—हस्तिमेह में पुरुष मस्त हाथी के जैसा वेगरहित मूतता है। **वसामेह** में वसा मिश्रित रहती है या मूत्र वसा जैसा गन्ध–वर्णवाला होता है। **मज्जामेह** ... अधिक कषाय और रूक्ष होता है जैसा कि मधु। इसमें शक्कर का अधिक अंश होने से वजन में भी भारी होता है। ये चार मेह वातजनित हैं तथा असाध्य हैं। **प्रमेहरोग** में रक्त, जलधातु, रस, शुक्र, वसा, लसीका, मज्जा, ओज प्रभृति सौम्य धातुयें दूषित होती हैं अतः इनका प्रतीकार भी श्लेष्मा जैसा होता है। इस तरह समान क्रिया होने से कफज साध्य होते हैं, विषमक्रिय होने से **पित्तज मेह** याप्य होते हैं तथा गम्भीर धातुओं के ...

वातिकानामुपद्रवाः—**वातजानामुदावर्त्तकम्पहृद्ग्रहलोलताः।**
शूलमुन्निद्रता शोषः कासः श्वासश्च जायते॥

प्रमेहदोषदूष्यवर्गमाह—**कफः सपित्तः पवनश्च दोषा मेदोऽस्रशुक्राम्बुवसालसीका।**
मज्जारसौजः पिशितं च दूष्याः प्रमेहिणां विंशतिरेव मेहाः॥

उपेक्षाकृतो मधुमेहत्वं यान्ति—**सर्व एव प्रमेहास्तु कालेनाप्रतिकारिणः।**
मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि॥

मधुमेहे मधुसमं जायते स किल द्विधा। क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथवा।

करने एवम् महात्ययिक होने के कारण **वातज मेह** असाध्य ही होते हैं। मूत्र का किसी तरह गँदला और अधिक मात्रा में होना ही सामान्यतः प्रमेह का लक्षण है। पर इसमें पूर्वरूप पर भी ध्यान देना चाहिये ॥ ६२ ॥

सोमरोगप्रमेहपिटिकयोर्भेदाः—

सोमरोगस्तथा चैकः प्रमेहपिटिका दश ।
शराविका कच्छपिका पुत्रिणी विनताऽलजी ॥ ६३ ॥
मसूरिका सर्षपिका जालिनी च विदारिका ॥
विद्रधिश्च दशैताः स्युः पिटिका मेहसम्भवाः ॥ ६४ ॥

सोम (१)रोग एक ही प्रकार का होता है।

विमर्श—इसमें सर्वशरीरगत जल धातु क्षुभित होकर निर्मल जल जैसा अधिक मात्रा में बाम्बार मूत्र-मार्ग से जाता है। इसमें इतना वेग होता है कि संभाल नहीं जाता। यह सिर्फ स्त्रियों को ही होता है। यद्यपि इसके लक्षणादि उदकमेह के तुल्य ही हैं तथापि इसे अलग रोग माना गया है, क्योंकि प्रमेह स्त्रियों को नहीं होता। **अब्धातु** के क्षय से इस रोग में प्यास, मुख का सूखना, गात्रसाद, बलहानि आदि हो जाते हैं।

प्रमेह(२)पिडका दस प्रकार की होती हैं १–शराविका, २–कच्छपिका, ३–पुत्रिणी, ४–विनता, ५–अलजी, ६–मसूरिका, ७–सर्षपिका, ८–जाहिनी, ९–विदारिका और १०विद्रधि।

---

(१) सोमरोगमाह—**स्त्रीणामतिप्रसङ्गेन शोकाच्चापि श्रमादपि ।**
अतिसारकयोगाद्वा गरयोगात्तथैव च ॥
आपः सर्वशरीरस्थाः क्षुभ्यन्ति च स्रवन्ति च ।
तस्यास्ताः प्रच्युताः स्थानान्मूत्रमार्गं व्रजन्ति हि ॥
प्रसन्ना विमलाः शीता निर्गन्धा नीरुजाः सिताः ।
स्रवन्ति चातिमात्रं ताः सा न शक्नोति दुर्बला ॥
वेगं धारयितुं तासां न सुखं बिन्दते क्व चित् ।
शिरःशिथिलता तस्या मुखं तालु च शुष्यति ॥
मूर्च्छा जृम्भा प्रलापश्च त्वग्रूक्षा चातिमात्रतः ।
भक्ष्यैर्भोज्यैश्च पेयैश्च न तृप्तिं लभते सदा ॥
सन्धारणाच्छरीरस्य ता आपः सोमसंज्ञिताः ।
ततः सोमक्षयात्स्त्रीणां सोमरोग इति स्मृतः ॥

(२) प्रमेहपिडिकाया **ये यन्मयाः स्मृता मेहास्तेषामेतास्तु तन्मयाः ।**
लक्षणानि–कारणञ्च—**विना प्रमेहमप्येता जायन्ते दुष्टमेदसः ॥**
तावच्चैता न लक्ष्यन्ते यावद्वास्तुपरिग्रहाः ॥
अन्तोन्नता च तद्रूपा निम्नमध्या शराविका ।
सदाहा कूर्मसंस्थाना ज्ञेया कच्छपिका बुधैः ॥

विमर्श—१–**शराविका**–शराव जैसी बीच में नीची और चारों ओर ऊँची होती। २–**कच्छपिका**–कछुए की जैसी बीच में ऊची तथा चारों ओर उतार वाली दाहयुक्त होती। ३–**पुत्रिणी**–पिडका के चारों ओर छोटी छोटी पिडकायें होती हैं। ४–**विनता**–यह पिडका पीड़ा और क्लेद वाली, नीले रङ्ग की पेट या पीठ में होती है। ५–**अलजी** पिडका एकत्र छोटे छोटे फुन्सियों के समूह को कहते हैं। ६–**मसूरिका**–मसूर जैसी फुंसियों को कहते। ७–**सर्षपिका**–सफेद सरसो जैसी फुंसियों को कहते हैं। ८–**जालिनी**–पिडका मांसजाल घिरी हुई अत्यन्त दाहवती होती है। ९–**विदारिका**–विदारीकन्द जैसी गोल उभरी हुई होती। **विद्रधिका**–विद्रधि जैसी होती है। प्रमेह की उपेक्षा से मेद के अत्यन्त दूषित हो जा ही ये पिडकायें उत्पन्न होती हैं। विना प्रमेह के भी मेदोदुष्टि से ये पिडकायें हो जा इनकी चिकित्सा व्रणवत् जानें ॥६३–६४॥

मेदोदोषशोथरोगभेदाः–**मेदोदोषस्तथा चैकः शोथरोगा नव स्मृताः।**
दोषैः पृथग्द्वयैः सवरभिघाताद्विषादपि ॥ ६९ ॥

मेदोरोग(१) एक ही तरह का होता है।

विमर्श—जो कफकारक मधुरप्राय और स्निग्ध भोजन करते एवं व्यायाम नहीं उन्हींको चरबीके अधिक बढ़ जानेसे यह रोग होता है। हलुवा पूरी खाकर गद्दे तकिये

जालनी तीव्रदाहा तु मांसजालसमावृता। अवगाढरुजोत्क्लेदा पृष्ठे वाऽप्युदरेऽपि।
महती पिडिका नीला सा बुधैर्विनता स्मृता।
रक्ता सिता स्फोटवती दारुणा त्वलजी भवेत् ॥
मसूरदलसंस्थाना विज्ञेया तु मसूरिका। गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी।
महत्यल्पचिता ज्ञेया पिडिका चापि पुत्रिणी।
विदारिकन्दवद् वृत्ता कठिना च विदारिका ॥
विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा ॥
असाध्यलक्षणादि—**गुदे हृदि शिरस्यंसे पृष्ठे मर्मसु चोत्थिताः।**
सोपद्रवा दुर्बलाग्नेः पिडिकाः परिवर्जयेत् ॥
उपद्रवानाह—**तृट्कासमांससङ्कोचमोहहिक्कामदज्वराः।**
विसर्पमर्मसंरोधाः पिडिकानामुपद्रवाः ॥
(१) मेदोनिदानम्—**अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः।**
मधुरोऽन्नरसः प्रायः स्नेहान्मेदः प्रवर्द्धयेत् ॥
मेदसावृतमार्गत्वात्पुष्यन्त्यन्येन धातवः। मेदस्तु चीयते तस्मादशक्तः सर्वकर्मसु।
मेदसः स्थितिः—**मेदस्तु सर्वभूतानामुदरेऽणवस्थिसंस्थितम्।**
अत एवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ॥
मेदस्विलक्षणम्—**क्षुद्रश्वासतृषामोहस्वप्नक्रथनसादनैः।**
युक्तः क्षुत्स्वेददौर्गन्ध्यैरल्पप्राणोऽल्पमैथुनः ॥

हमेशा बैठे रहने वाले सेठों को इसीलिये यह रोग अधिक होता है। मेद की स्थिति उदरके अण्वस्थियों में होनेसे इस रोगमें तोंद निकल आता है। इसमें क्षुद्रश्वास, प्यास, मोह, नींद, कथन, अवसाद, भूख अधिक लगना, पसीना ज्यादा निकलना तथा शरीरसे दुर्गन्ध आना आदि उपद्रव अधिक होते हैं। मेदस्वी अधिक परिश्रम और मैथुन नहीं कर सकता।

शोथ-(१) रोग नौ प्रकार के होते हैं। १ वातज २ पित्तज, ३ कफज, ४ वातकफज ५ वातपित्तज, ६ पित्तकफज। इस तरह एक दोषज तीन और द्विदोषज तीन, कुल ६ हुये और सन्निपातज एक अभिघातज एक और विषज एक, इस प्रकार यह नौ तरह का होता है।

तदतिवृद्धत्वेन वह्नेर्दीप्त-मेदसावृतमार्गत्वाद्वायुः कोष्ठे विशेषतः।

तामाह— चरन् सन्धुक्षयत्यग्निमाहारं शोषयत्यपि॥
तस्मात्स शीघ्रं जरयत्याहारं चापि काङ्क्षति।
विकारांश्चाश्नुते घोरान् कांश्चित्कालव्यतिक्रमात्॥

एतावुपद्रवकरौ विशेषादग्निमारुतौ। एतौ हि दहतः स्थूलं वनं दावानलो यथा॥

अतीवसंवृद्धे दोषाः—मेदस्यतीवसंवृद्धे सहसवानिलादयः।
विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवितम्॥

अतिस्थूललक्षणम्—मेदोमांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः।
अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते॥

(१) शोथनिदानं ल-रक्तपित्तकफान्वायुर्दुष्टो दुष्टान्बहिःसिराः।
क्षणञ्च— नीत्वा रुद्धगतिस्तैर्हि कुर्यात् त्वङ्मांससंश्रयम्॥
उत्सेधं संहतं शोथं तमाहुर्निचयादतः।
शुद्ध्यामयाभुक्तकृशाबलानां क्षाराम्लतीक्ष्णोष्णगुरूपसेवा।
दध्यामसृच्छाकविरोधिदुष्टगरोपसृष्टान्ननिषेवणं च॥
अर्शांस्यचेष्टा वपुषो ह्यशुद्धिर्मर्मोपघातो विषमा प्रसूतिः।
मिथ्योपचारः परिकर्मणा च निजस्य हेतुः श्वयथोः प्रदिष्टः॥
सगौरवं स्यादनवस्थितत्वं सोत्सेधमूष्माऽथ शिरातनुत्वम्।
सलोमहर्षश्च विवर्णता च सामान्यलिङ्गं श्वयथोः प्रदिष्टम्॥

वातजमाह—चलस्तनुत्वक् परुषोऽरुणोऽसितः प्रसुप्तिहर्षार्तियुतो निमित्ततः।
प्रशाम्यति प्रोन्नमति प्रपीडितो दिवाबली च श्वयथुः समीरणात्॥

पित्तजमाह—मृदुः सगन्धोऽसितपीतरागवान् भ्रमस्वरस्वेदतृषामदान्वितः।
य उष्यते स्पर्शरुगक्षिरोगकृत् पित्तस्य शोफो भृशदाहपाकवान्॥
गुरुः स्थिरः पाण्डुररोचकान्वितः प्रसेकनिद्रावमिवह्निमान्द्यकृत्।
स कृच्छ्रजन्मप्रशमो निपीडितो न चान्नमेद्रात्रिबली कफात्मकः॥

संसर्गजं त्रिदोषजं चाह—निदानाकृतिसंसर्गाच्छ्वयथुः स्याद् द्विदोषजः।

विमर्श--अभिघातज शोथ चोट आदिके लगनेसे तथा **विषज** विषसंस्पर्शसे होते हैं। वायु दूषित होकर रक्त, पित्त और कफ को बाह्य शिराओं में ले जाकर रु होनेसे त्वक् और मांसमें रह कर शोथ यानी सूजन उत्पन्न करता है। यह **व्रण शोथ** से ही है। **व्रणशोथ** के त्वक्, मांस, शिरा स्नायु आदि आठ आश्रय होते हैं पर शोथके त्वक् और मांस ही हैं। **व्रणशोथ** सिर्फ एक ही अङ्गमें होता है पर **शोथ** सर्वगात्रमें भी है। अतः **शोथ** पृथक् रोग है ॥ ६५ ॥

वृद्धिरोगभेदाः—**वृद्धयः सप्त गदिता वातात्पित्तात्कफेन च ।**
रक्तेन मेदसा मूत्रादन्त्रवृद्धिश्च सप्तमी ॥ ६६ ॥

वृद्धि—(१) यानी अण्डकोषके बढ़ने का रोग सात प्रकार का होता है। १ वात २ पित्तज, ३ कफज, ४ रक्तज, ५ मेदोज, ६ मूत्रज तथा ७ अन्त्रवृद्धि।

सर्वाकृतिः सन्निपाताच्छोफो व्यामिश्रलक्षणः ॥
अभिघातजमाह—**अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः ।**
हिमानिलोदध्यनिलैर्भल्लातकपिकच्छुजैः ॥
रसैः शूकैश्च संस्पर्शात् श्वयथुः स्याद्विसर्पवान् ।
भृशोष्मा लोहिताभासः प्रायशः पित्तलक्षणः ॥

विषजमाह—

विषजः सविषप्राणिपरिसर्पणमूत्रणात् । दंष्ट्रादन्तनखाघातादविषप्राणिनामपि ।
विण्मूत्रशुक्रोपहतमलवद्वस्त्रसङ्करात् । विषवृक्षानिलस्पर्शाद् गरयोगावचूर्णनात् ।
मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः ॥

यत्र स्थिता दोषा यत्र-**दोषाः श्वयथुमूर्ध्वं हि कुर्वन्त्यामाशयस्थिताः ।**
शोथं कुर्वन्ति तदाह—**पक्वाशयस्था मध्ये तु वर्चःस्थानगतास्त्वधः ॥**
कृत्स्नदेहमनुप्राप्ताः कुर्युः सर्वसरं तथा ।
श्वयथोरुपद्रवाः—**श्वासः पिपासा दौर्बल्यं छर्दिश्च ज्वर एव च ।**
यस्य चान्ने रुचिर्नास्ति शोथिनं तं विवर्जयेत् ॥
छर्दिस्तृष्णाऽरुचिः श्वासो ज्वरोऽतीसार एव च ।
सप्तकोऽयं सदौर्बल्यः शोथोपद्रवसंग्रहः ॥

यो मध्यदेशे श्वयथुः स कष्टः सर्वगश्च यः । अर्द्धाङ्गेऽरिष्टभूतः स्याद् यश्चोर्ध्वं परि
अनन्योपद्रवकृतः शोथः पादसमुत्थितः । पुरुषं हन्ति नारीं तु मुखजो गुह्यजो द्व
नवोऽनुपद्रवः शोथः साध्योऽसाध्यः पुरेरितः ।
विवर्जयेत् कुक्ष्युदराश्रितं च तथा गले मर्मणि संश्रितं च ।
स्थूलः खरश्चापि भवेद् विवर्ज्यो यश्चापि बालस्थविराबलाना

(१) वृद्धिनिदानम्—**क्रुद्धोऽनूर्ध्वगतर्वायुः शोथशूलकरश्चरन् ।**

विमर्श—अपान वायु कुपित होकर जब दोषोंको वङ्क्षण सन्धिसे शोथ और शूल के साथ **अण्डकोष** में पहुंचाता है तब अण्डोंमें बहने वाली धमनियों को पीड़ित करके बड़ा कर देता है, सो दोषों से धमनी को पूर्ण करने से **दोषज,** रक्त से भर देने से **रक्तज,** मेद और मूत्र से पूर्ण करने से **मेदोज** और **मूत्रज** बृद्धियां होती हैं। कुपित वायु यदि क्षुद्रान्त्रों को पीडित कर वंक्षण में और फिर वंक्षण से फलकोष में ले जाता है तो **अन्त्रबृद्धि** होती है। यह सिर्फ शस्त्रकर्म से ही अच्छी होती है॥ ६६॥

अण्डवृद्धिगण्डमालिकागण्डालजीरोगाः—

अण्डवृद्धिस्तथा चैका तथैका गण्डमालिका। गण्डालजीति चैका स्याद्··· ॥ ६७॥

अण्डबृद्धि रोग (१) एक ही प्रकार का होता है।

विमर्श—इसे साधारण में **कुरण्ड** कहते हैं। उपर्युक्त रोग में **धमनी** की बृद्धि होती है, पर इसमें **अण्ड** की बृद्धि होती है। यह भेद है।

सुष्कौ वङ्क्षणतः प्रायः फलकोषाभिवाहिनीः॥
प्रपीडय धमनीर्बृद्धिं करोति फलकोषयोः। दोषास्रमेदोमूत्रान्त्रैः स बृद्धिः सप्तधा गदः॥
मूत्रान्त्रजावप्यनिलाद्धेतुभूतश्च केवलः।
तादिभेदेन लक्षणानि—वातपूर्णदृतिस्पर्शो रूक्षो वातादिहेतुरुक्।
पक्वोदुम्बरसंकाशः पित्ताद्दाहोष्मपाकवान्॥
कफाच्छीतो गुरुः स्निग्धः कण्डूमान् कठिनोऽल्परुक्।
कृष्णस्फोटावृतः पित्तबृद्धिलिङ्गश्च रक्तजः॥
कफवन्मेदसो बृद्धिर्मृदुस्तालफलोपमः॥
मूत्रजमाह—मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः।
अम्भोभिः पूर्णदृतिवत् क्षोभं याति सुरुङ्मृदुः॥
मूत्रकृच्छ्रमधस्तात्तु चालयन् फलकोशयोः।
अन्त्रबृद्धिमाह—वातकोपिभिराहारैः शीततोयावगाहनैः।
धारणेरणभाराध्वविषमाङ्गप्रवर्त्तनैः॥
क्षोभणैः क्षुभितोऽन्यश्च क्षुद्रान्त्रावयवं यदा।
पवनो विगुणीकृत्य स्वनिवेशादधो नयेत्।
कुर्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा॥
(१) अण्डबृद्धिः—उपेक्षमाणस्य च मुष्कबृद्धिमाध्मानरुक्स्तम्भवतीं स वायुः।
प्रपीडितोऽन्तः स्वनवान् प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः॥
बृद्धेरसाध्यता—यस्यान्त्रावयवाश्लेषान्मुष्कयोर्वातसञ्चयात्।
अन्त्रबृद्धिरसाध्योऽसौ वातबृद्धिसमाकृतिः॥

गण्डमाला रोग—(१) एक ही प्रकार का होता है।

विमर्श—वात, पित्त, कफ तथा मेद एकत्र ग्रथित होकर जंघास्थित कण्डरा में होने से मछली के अण्डतुल्य गोल गांठ सी उत्पन्न करते हैं। वायुकर्त्तृक ऊपर को प्रे... से दोष कक्षा, मन्या, अंस तथा गलदेशों में भी ऐसे ही गण्ड उत्पन्न करते हैं। ये ग... बेर या आमले जैसी बड़ी होती हैं। माला जैसी एक पंक्ति में कई गण्ड उत्पन्न होने... **गण्डमाला** कहते हैं। इसमें वात, कफ तथा मेद ही अधिक प्रबल होते हैं, अतः ... नहीं है। जिसमें पित्त की अधिकता होती है वह पक भी जाती है। यही गण्ड यदि... विरल हो तो उसको अपची कहते हैं॥ ६७॥

विमर्श—गण्डालजी—(२) या **गलगण्ड** रोग एक ही है। यह भी वात, ...

---

(१) गण्डमालानिदा-नम्— **कर्कन्धुकोलामलकप्रमाणैः कक्षांसमन्यागलवङ्क्षणेषु। मेदःकफाभ्यां चिरमन्दपाकैः स्याद् गण्डमाला बहुभिश्च...**

अपची— **ते ग्रन्थयः केचिदवाप्तपाकाः स्रवन्ति नश्यन्ति भवन्ति च... कालानुबन्धं चिरमादधाति सैवापचीति प्रवदन्ति तज्ज्ञाः**

साध्यासाध्ये— **साध्याः स्मृताः पीनसपार्श्वशूलकासज्वरच्छर्दियुतास्त्वसा...**

भोजोक्तं गण्डमालाऽप-च्योर्लक्षणे— **वातपित्तकफा वृद्धा मेदश्चापि समाचितम्। जङ्घयोः कण्डरां प्राप्य मत्स्याण्डसदृशान् बहून्॥ कुर्वन्ति ग्रथितास्तेभ्यः पुनः प्रकुपितोऽनिलः। तान्दोषानूर्ध्वगो वक्षः कक्षमन्यागलाश्रितः॥**

नानाप्रकारान् कुरुते ग्रन्थीन्सा त्वपची मता। अपची कण्ठमन्यासु कक्षावङ्क्ष... गण्डमालां विजानीयादपचीतुल्यलक्षणाम्।

(२) गण्डालजी (गलगण्ड) निदानम्— **निबद्धः श्वयथुर्यस्य मुष्कवल्लम्बते गले। महान्वा यदि वा ह्रस्वो गलगण्डं तमादिशेत्॥**

सम्प्राप्तिः सामान्यलक्षणञ्च— **वातः कफश्चापि गले प्रदुष्टो मन्ये तु संश्रित्य तथैव मेदः। कुर्वन्ति गण्डं क्रमतः स्वलिङ्गैः समन्वितं तं गलगण्डमाहुः॥**

भोजेनाप्युक्तम्— **महान्तं शोथमल्पं वा हनुमन्यागलाश्रयम्। लम्बन्तं मुष्कवद्दृष्टं गलगण्डं विनिर्दिशेत्॥**

तत्र वातप्राधान्यमाह— **तोदान्वितः कृष्णशिराऽवनद्धः श्यावारुणो वा पवनात्मकस्तु। पारुष्ययुक्तश्चिरवृद्धिपाको यदृच्छया पाकमियात्कदाचित्। वैरस्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रशोषः॥**

कफप्राधान्यमाह— **स्थिरः सवर्णो गुरुरुग्रकण्डूः शीतो महांश्चापि कफात्मकस्तु। चिराभिवृद्धिं भजते चिराद् वा प्रपच्यते मन्दरुजः कदाचित्। माधुर्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रलेपः॥**

मेद से ही उत्पन्न होता । हनु, मन्या तथा गल देश इसके स्थान हैं। यह बकरे के गले की लुड़की जैसा रूप का होता है ॥ ६७ ॥

ग्रन्थिभेदाः–···ग्रन्थयो नवधा मताः त्रिभिर्दोषैस्त्रयो रक्ताच्छिराभिर्मेदसो व्रणात्।
अस्थ्ना मांसेन नवमः······॥ ६८ ॥

(१)**ग्रन्थि रोग**—नौ प्रकार का होता है। १ वातज ग्रन्थि, २ पित्तजग्रन्थि, ३ श्लेष्मज ग्रन्थि, ४ रक्तज ग्रन्थि, ५ शिराज ग्रन्थि, ६ मेदोजग्रन्थि, ७ व्रणजग्रन्थि, ८ अस्थिजग्रन्थि और ९ मांसजग्रन्थि।

विमर्श—वातादि दोष, रक्त, मांस, मेद, शिरा आदि को दूषित करके गोल और ऊपर को उभरी हुई गांठ सा शोथ तत्तत्स्थानों में उत्पन्न करते हैं, अतः आकृति की समानता से उन्हें भी **ग्रन्थि** कहते हैं ॥ ६८ ॥

अर्बुदभेदाः—······षड्विधं स्यात्तथाऽर्बुदम् ।
वातात्पित्तात्कफाद्रक्तान्मांसादपि च मेदसः ॥ ६९ ॥

अर्बुदरोग—(२) छः प्रकार का होता है। १ वातार्बुद, २ पित्तार्बुद, ३ श्लेष्मार्बुद, ४ रक्तार्बुद, ५ मांसार्बुद, और ६ मेदोऽर्बुद।

मेदः प्राधान्यमाह—**स्निग्धो गुरुः पाण्डुरनिष्टगन्धो मेदोभवः स्वल्परुजोऽतिकण्डूः ।**
प्रलम्बतेऽलाबुवदल्पमूलो देहानुरूपक्षयवृद्धियुक्तः ।
स्निग्धास्यता तस्य भवेच्च जन्तोर्गलेऽनुशब्दं कुरुते च नित्यम् ।

(१) ग्रन्थिनिदानम्—**वातादयो मांसमसृक्प्रदुष्टाः सन्दूष्य मेदश्च तथा शिराश्च ।**
वृत्तोन्नतं विग्रथितं तु शोथं कुर्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥

वातजमाह—**आयम्यते वृश्चयति तुद्यते च प्रत्यस्यते मथ्यति भिद्यते च ।**
कृष्णो मृदुर्बस्तिरिवाततश्च भिन्नः स्रवेच्चानिलजोऽस्रमच्छम् ॥

पित्तजमाह—**दन्दह्यते धूप्यति चूष्यते च प्रपच्यते प्रज्वलतीव चापि ।**
रक्तः सपीतोऽप्यथवाऽपि पित्ताद्भिन्नः स्रवेद् दुष्टमतीव चास्रम् ॥

कफजमाह—**शीतोऽविवर्णोऽल्परुजोऽतिकण्डूः पाषाणवत्संहननोपपन्नः ॥**
चिराभिवृद्धिश्च कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघनं च पूयम् ॥

मेदोजमाह—**शरीरवृद्धिक्षयवृद्धिहानिः स्निग्धो महान् कण्डुयुतोऽल्परुक् च ।**
मेदःकृतो गच्छति चात्र भिन्ने पिण्याकसर्पिष्प्रतिमं च मेदः ॥

शिराजमाह—**व्यायामजातैरबलस्य तैस्तैराक्षिप्य वायुर्हि शिराप्रतानम् ।**
सङ्कुच्य सम्पीडय विशोष्य चापि ग्रन्थिं करोत्युन्नतमाशु वृत्तम् ॥

(२) अर्बुदस्य सम्प्राप्ति-**गात्रप्रदेशे क्वचिदेव दोषाः समुत्थिता मांसमसृक् प्रदूष्य ।**
लक्षणञ्च— **वृत्तं स्थिरं मन्दरुजं महान्तमनल्पमूलं चिरवृद्ध्यपाकम् ॥**
कुर्वन्ति मांसोच्छ्रयमत्यगाध तदर्बुदं शास्त्रविदो वदन्ति ॥
वातेन पित्तेन कफेन चापि मांसेन रक्तेन च मेदसा च ।
यज्जायते तस्य च लक्षणानि ग्रन्थेः समानानि तदा भवन्ति ॥

विमर्श—अर्बुद को साधारण भाषा में **रसौली** कहते हैं। वे शरीर में कहीं पर सकते हैं। दोष मांस और रक्त को दूषित करके गोल, बड़े आकार में, गम्भीर मूल और अत्यल्प पीडादायक शोथ उत्पन्न करते हैं। यही अर्बुद है। ये अर्बुद धीरे धीरे रहते हैं और कभी भी नहीं पकते। **माधवनिदान** में दो प्रकार का अर्बुद—**अध्यर्बुद** **द्विरर्बुद** अधिक कहा है। यदि एक अर्बुद के ऊपर और एक अर्बुद उत्पन्न हो जाय **अध्यर्बुद** और एक साथ अथवा क्रमसे एकत्र दो अर्बुद हो तो उसे **द्विरर्बुद** कहते ये उपर्युक्त छः प्रकार में से किसी भी **अर्बुद** के हो सकते हैं, अतः यह प्रकार भेद नहीं अवस्थान्तर ही है। इसलिये यहाँ उनका पृथक् पाठ नहीं है ॥ ६९ ॥

श्लीपदभेदाः - **श्लीपदं च त्रिधा प्रोक्तं वातात्पित्तात्कफादपि ॥ ७० ॥**

श्लीपद रोग—(१) तीन प्रकार का होता है। १ वातिक, २ पैत्तिक और ३ श्लैष्मिक

रक्तार्बुदमाह—**दोषः प्रदुष्टो रुधिरं शिराश्च सङ्कुच्य सम्पीडय ततस्त्वपाक्यम्।**
सास्रावमुन्नह्यति मांसपिण्डं मांसाङ्कुरराचितमाशु वृद्धम्।
करोत्यजस्रं रुधिरप्रवृत्तिमसाध्यमेतद्रुधिरात्मकं तु।
रक्तक्षयोपद्रवपीडितत्वात्पाण्डुर्भवेत्सोऽर्बुदपीडितस्तु ॥

मांसार्बुदमाह—**मुष्टिप्रहारादिभिरर्दितेऽङ्गे मांसं प्रदुष्टं जनयेद्धि शोथम्।**
अवेदनं स्निग्धमनन्यवर्णमपाकमश्मोपसमप्रचाल्यम् ॥
प्रदुष्टमांसस्य नरस्य गाढमेतद् भवेन्मांसपरायणस्य।
मांसार्बुदं त्वेतदसाध्यमुक्तं साध्येष्वपीमानि विवर्जयेत्तु ॥
सम्प्रस्रुतं मर्मसु यच्च जातं स्रोतःसु वा यच्च भवेदचाल्यम्।

अध्यर्बुद-द्विरर्बुदयोर्लक्षणम्—**यज्जायतेऽन्यत् खलु पूर्वजाते ज्ञेयं तदध्यर्बुदमर्बुदज्ञैः।**
यद् द्वन्द्वजातं युगपत् क्रमाद्वा द्विरर्बुदं तच्च भवेदसाध्यम्।

अर्बुदानां पाकाभावे हेतुमाह—**न पाकमायान्ति कफाधिकत्वान्मेदोबहुत्वाच्च विशेषतस्तु।**
दोषस्थिरत्वाद् ग्रथनाच्च तेषां सर्वार्बुदान्येव निसर्गतस्तु।

(१) अथ श्लीपदनिदानम्—**मेदोमांसाश्रयं शोफं पादयोः श्लीपदं भवेत्।**
स्वलिङ्गदर्शिभिर्दोषैस्त्रिधा स्याच्च कफोत्तरम् ॥

सम्प्राप्तिमाह—**यः सज्वरो वङ्क्षणजो भृशार्त्तिः शोथो नृणां पादगतः क्रमेण।**
तच्छ्लीपदं स्यात्करकर्णनेत्रशिश्नौष्ठनासास्वपि केचिदाहुः।

वातजमाह—**वातजं कृष्णरूक्षं च स्फुटितं तीव्रवेदनम्।**
अनिमित्तरुजं तस्य बहुशो ज्वर एव च ॥

पित्तजमाह—**पित्तजं पीतसङ्काशं दाहज्वरयुतं मृदु।**

कफजमाह—**श्लैष्मिकं स्निग्धवर्णं च श्वेतं पाण्डु गुरु स्थिरम् ॥**

असाध्यमाह—**वल्मीकमिव सञ्जातं कण्टकैरुपचीयते।**
अब्दात्मकं महत्तच्च वर्जनीयं विशेषतः ॥

विमर्श—इस रोग में रुग्ण अङ्ग शिलावत् भारी हो जाता है, अतः **श्लीपद** संज्ञा है। प्रायः पाद में ही यह रोग होता है। पर हाथ, कान, नाक, नेत्र के पलक, शिश्न और ओष्ठ में भी हो सकता है। रोग वृद्धि को प्राप्त होने से पाँव हाथी के जैसा मोटा हो जाता है, अतः साधारण में यह **फीलपाँव** के नाम से प्रसिद्ध है। इसमें प्रथम ज्वर होकर वङ्क्षण सन्धि में कुछ शोथ होता है, फिर शोथ पावों में चला जाता है। यह पुराना पानी और सीड अधिक वाले **अनूप** देश में ही अधिक होता है। **पाश्चात्त्य मत** से यह रोग रस एवं रक्तज **सर्पिल** कृमि विशेष के लसीका मार्गों को रोकने से लसीका संचित होकर होता है। यह रोग प्रायः असाध्य होता है। एक साल बीतने पर तो यह सर्वथा असाध्य हो जाता है। इसके अन्यान्य लक्षणादि निदान में देखें ॥ ७० ॥

व्रणभेदाः—**विद्रधिः षड्विधः ख्यातो वातपित्तकफैस्त्रयः ।**
रक्तात् क्षतात् त्रिदोषैश्च……॥ ७१ ॥

विद्रधि रोग—छः प्रकार का होता है। १–वातिक विद्रधि, २–पैत्तिक विद्रधि, ३–श्लैष्मिक विद्रधि, ४–रक्तज विद्रधि, ५–क्षतज विद्रधि और ६–सान्निपातिक विद्रधि।

विमर्श—त्वक्, रक्त, मांस और मेद को दूषित कर, हड्डियों के आश्रय पर दोष शनैः शनैः अत्युच्च और भयंकर शोथ को उत्पन्न करते हैं। इसे (१) **विद्रधि** कहते हैं। यह गोल

कफस्य व्यभिचारेण प्राधान्यम्—**त्रीण्यप्येतानि जानीयाच्छ्लीपदानि कफोच्छ्रयात् ।**
गुरुत्वं च महत्त्वं च यस्मान्नास्ति कफाद्विना ॥

श्लीपदसम्भवे हेतुभूतान् देशानाह—**पुराणोदकभूयिष्ठाः सर्वर्त्तुषु च शीतलाः ।**
ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः ॥

परमसाध्यलक्षणम्—**यच्छ्लेष्मलाहारविहारजातं पुंसः प्रकृत्याऽपि कफात्मकस्य ।**
सास्रावमत्युन्नतसर्वलिङ्गं सकण्डुरं श्लेष्मयुतं विवर्ज्यम् ॥

(१) विद्रधीनां सम्प्राप्तिः—**त्वग्रक्तमांसमेदांसि प्रदूष्यास्थिसमाश्रिताः ।**
दोषाः शोथं शनैर्घोरं जनयन्त्युच्छ्रिता भृशम् ॥

सामान्यं लक्षणम्—**महामूलं रुजावन्तं वृत्तं वाऽप्यथवाऽऽयतम् ।**
स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः ॥

वातपित्तकफसन्निपातजानां क्रमेण लक्षणानि—

कृष्णोऽरुणो वा विषमो भृशमत्यर्थवेदनः । चित्रोत्थानप्रपाकश्च विद्रधिर्वातसम्भवः ।
पक्वोदुम्बरसङ्काशः श्यावो वा ज्वरदाहवान् । क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः॥
शरावसदृशः पाण्डुः शीतः स्निग्धोऽल्पवेदनः। चिरोत्थानप्रपाकश्च विद्रधिः कफसम्भवः॥
तनुपीतसिताश्चैषामास्रावाः क्रमतः स्मृताः ॥
नानावर्णरुजास्रावो घाटालो विषमो महान् ।
विषमं पच्यते चापि विद्रधिः सान्निपातिकः ॥

या लम्बा, चौड़ा, गम्भीर और भयङ्कर पीडायुक्त होता है। यह **बाह्य** और आभ्य- से दो तरह का होता है। **बाह्य विद्रधि** शरीर के ऊपर कहे अनुसार होता है। आ- **विद्रधि** शरीर के अन्दर आशयों में गुदा, वस्तिमुख, नाभि, कुक्षि, वङ्क्षण, वृक्क, यकृत्, क्लोम तथा हृदय में होता है। **बाह्य विद्रधि** वातादि दोषानुसार लक्षण वा- **सांनिपातिक विद्रधि** सर्व दोषों के लक्षण वाला होता है। बाहर से कोई भारी शोथ या क्षत हो जाने पर यदि उपेक्षा अथवा अपथ्यसेवा हो तो वायु क्षत की गर्मी से

क्षतजमाह (आगन्तुजमाह)—

तैस्तर्भावैरभिहते क्षते चापथ्यकारिणः। क्षतोष्मा वायुविसृतः सरक्तं पित्तमी- ज्वरस्तृष्णा च दाहश्च जायन्ते तस्य देहिनः। आगन्तुर्विद्रधिह्येषपित्तविद्रधिल-

रक्तजमाह—**कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाज्वरः।**
पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते॥

अन्तर्विद्रधीनाह—**पृथक् सम्भूय वा दोषाः कुपिता गुल्मरूपिणम्।**
वल्मीकवत्समुन्नद्धमन्तः कुर्वन्ति विद्रधिम्॥
आभ्यन्तरानतस्तूर्ध्वं विद्रधीन्परिचक्षते।
गुर्वसात्म्यविरुद्धान्न-शुष्कशाकाम्लभोजनात्॥
अतिव्यवायव्यायामवेगाघातविदाहिभिः।

आभ्यन्तरविद्रधीनां स्थानं लक्षणञ्च— **गुदे वस्तिमुखे नाभ्यां कुक्षौ वङ्क्षणयोस्तथा।**
वृक्कयोः प्लीह्नि यकृति हृदि वा क्लोम्नि वाऽप्यथ॥
गुदे वातनिरोधश्च बस्तौ कृच्छ्राल्पमूत्रता।
नाभ्यां हिक्का तथाऽटोपः कुक्षौ मारुतकोपनम्॥
कटिपृष्ठग्रहस्तीव्रो वङ्क्षणोत्थे च विद्रधौ।
वृक्कयोः पार्श्वसङ्कोचः प्लीह्न्युच्छ्वासावरोधनम्॥
सर्वाङ्गप्रग्रहस्तीव्रो हृदि कासश्च जायते।
श्वासो यकृति हिक्का च क्लोम्नि पेपीयते पयः॥

स्रावनिर्गममाह—**नाभेरुपरिजाः पक्वा यान्त्यूर्ध्वमितरे त्वधः।**

स्रावानुसारेण साध्यासाध्ये—**अधः स्रुतेषु जीवेत्तु स्रुतेषूर्ध्वं न जीवति॥**

साध्यासाध्यत्वे—**हृन्नाभिवस्तिवर्ज्या ये तेषु भिन्नेषु बाह्यतः।**
जीवेत् कदा चित् पुरुषो नेतरेषु कदा चन॥
साध्या विद्रधयः पञ्च विवर्ज्यः सान्निपातिकः।
आमपक्वविदग्धत्वं तेषां शोफवदादिशेत्॥
आध्मातं बद्धनिष्यन्दं छर्दिहिक्कातृषाऽन्वितम्।
रुजाश्वाससमायुक्तं विद्रधिर्नाशयेन्नरम्॥

कर रक्त एवं पित्त को भी उभाड़ कर, ज्वर, तृष्णा और दाह के साथ विद्रधि में परिणत कर देता है। इसके लक्षण प्रायः पित्त विद्रधिवत् होते हैं। यही **क्षतज** या **आगन्तु विद्रधि** है। **आभ्यन्तर विद्रधियों** के विशेष लक्षण ये हैं—**गुदा में** होने से अधोवायु का निरोध होता है। **बस्तिमुख** में होने से मुश्किल से और थोड़ा सा पेशाब आता है। **नाभि में** होने से हिचकी और आटोप होता है। **कोख में** होने के वात का कोप होता है। **वङ्क्षण सन्धि में** होने से कमर और पृष्ठ का जकड़ना होता है। **वृक्कों में** होने से पसवाड़े सिकुड़ जाते हैं। **प्लीहा में** होने से उच्छ्वास का अवरोध होता है। **हृदय में** होने से प्रत्येक अङ्ग में व्यथा तथा का[illegible] होता है। **यकृत् में होने** से श्वास और हिचकी होती है तथा **क्लोम में** होने से बहुत प्यास मालूम होता है। **हारीत मुनि** कहते हैं कि **नाभि के ऊपर के विद्रधि** पक कर फूटने पर रक्त-मिश्रित पूय मुख से निकलता है तथा **नाभि के नीचे के विद्रधि** फूटने से उभय मार्ग से स्राव होता है। यदि **नीचे को स्राव** हो तो रोगी अच्छा हो सकता है, पर ऊर्ध्वस्राव होने से जीने की आशा नहीं होती। यदि आध्मान हो, बद्ध हो, स्राव न हो, कै, हिक्का, प्यास, पीड़ा तथा श्वास आदि उपद्रव हो तो भी यह रोग असाध्य ही होता है। इनके आम पक्व आदि अवस्था व्रणशोथवत् जानें। **गर्भिणी** या **प्रसूत** स्त्रियों के स्तन में भी दोष शोथ उत्पन्न कर विद्रधि उत्पन्न करते हैं। उसे **स्तनविद्रधि** कहते हैं॥ ७१॥

व्रणभेदाः— **···व्रणाः पञ्चदशोदिताः। तेषां चतुर्द्धा भेदाः स्युरागन्तुर्देहजस्तथा।**

शुद्धो दुष्टश्च विज्ञेयस्तत्संख्या कथ्यते पृथक्।

वातव्रणः पित्तजश्च कफजो रक्तजो व्रणः॥ ७२॥

वातपित्तभवश्चान्यो वातश्लेष्मभवस्तथा।

तथा पित्तकफाभ्यां च सन्निपातेन चाष्टमः॥ ७३॥

नवमो वातरक्तेन दशमो रक्तपित्ततः। श्लेष्मरक्तभवश्चान्यो वातपित्तासृगुद्भवः॥ ७४॥

वातश्लेष्मासृगुत्पन्नः पित्तश्लेष्मास्रसंभवः। सन्निपातासृगुद्भूत इति पञ्चदश व्रणाः॥७५॥

व्रण (१) पन्द्रह प्रकार के होते हैं। **सामान्यतः** वे चार प्रकार के होते हैं। **१–आगन्तु** यानी बाह्य प्रहारादि से उत्पन्न। २–**देहज** यानी शारीरिक दोष से उत्पन्न। ३–शुद्ध यानी दोषों

---

(१) व्रणपूर्वलक्षणम्—**एकदेशोत्थितः शोथो व्रणानां पूर्वलक्षणम्।**

पक्वापक्वविनिश्चयः—**विषमं पच्यते वातात् पित्तोत्थश्चाचिराच्चिरम्।**

कफजः पित्तवच्छोथो रक्तागन्तुसमुद्भवः॥

आमपच्यमानयोर्लक्षणे—**मन्दोष्मताऽल्पशोथत्वं काठिन्यं त्वक्सवर्णता।**

मन्दवेदनता चैव शोफानामामलक्षणम्॥

दह्यते दहनेनेव क्षारेणेव च पच्यते। पिपीलिकागणेनेव दश्यते छिद्यते तथा॥

भिद्यते चैव शस्त्रेण दण्डेनेव च ताडयते।

पीडयते पाणिनेवान्तः सूचीभिरिव तुद्यते॥

के प्रसर से रहित और ४–दुष्ट यानी दोषों से आक्रान्त। पुनः वात, पित्त, कफ और

सोषाचोषो विवर्णः स्यादङ्गुल्येवावपीड्यते।
आसने शयने स्थाने शान्ति वृश्चिकविद्धवत्॥
न गच्छेदाततः शोथो भवेदाध्मातवस्तिवत्।
ज्वरस्तृष्णाऽरुचिश्चैव पच्यमानस्य लक्षणम्॥

पक्वलक्षणम्—वेदनोपशमः शोथो लोहितोऽल्पो न चोन्नतः।
प्रादुर्भावो वलीनां च तोदः कण्डूर्मुहुर्मुहुः॥
उपद्रवाणां प्रशमो निम्नता स्फुटनं त्वचाम्।
वस्ताविवाम्बुसञ्चारः स्याच्छोथेऽङ्गुलिपीडिते॥
पूयस्य पीडयत्येकमन्तमन्ते च पीडिते।
भक्ताकाङ्क्षा भवेच्चतच्छोथानां पक्वलक्षणम्॥

एकदोषारब्धेऽपि शोथपाककाले त्रिदोषसम्बन्धमाह—

नर्त्तेऽनिलाद् रुग् न विना च पित्तं पाकः कफाच्चापि विना
तस्माद्धि सर्वे परिपाककाले पचन्ति शोफांस्त्रिभिरेव दोषैः

अनिर्हृतपूयस्य दोषत्वम्–कक्षं समासाद्य यथैव वह्निर्वाय्वीरितः सन्दहति प्रसह्य।
तथैव पूयोऽप्यविनिस्सृतो हि मांसं सिरास्नायुमपीह खादेत्

आमपक्वादिज्ञानाज्ञाने आमं विदह्यमानं च सम्यक् पक्वं च लक्षणैः।
भिषजां गुणदोषानाह– जानीयात्स भवेद्वैद्यः शेषास्तस्करवृत्तयः॥
यश्छिनत्त्याममज्ञानाद्यश्च पक्वमुपेक्षते।
श्वपचाविव मन्तव्यौ तावनिश्चितकारिणौ॥

व्रणनिदानम्—दोषजो दुष्टदोषः स्यादन्यः शस्त्रादिसम्भवः।

शुद्धव्रणलक्षणम्–जिह्वातलाभोऽतिमृदुः श्लक्ष्णः स्निग्धोऽल्पवेदनः।
सुव्यवस्थो निरास्रावः शुद्धो व्रण इति स्मृतः॥

शुद्धव्रणलक्षणम्—पूतिः पूयातिदुष्टासृक्स्राव्युत्सङ्गी चिरस्थितिः।
दुष्टव्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्ययः॥

वातादिजव्रणलक्षणम्–स्तब्धः कठिनसंस्पर्शो मन्दस्रावो महारुजः।
तुद्यते स्फुरति श्यावो व्रणो मारुतसम्भवः॥
तृष्णामोहज्वरक्लेददाहदुष्ट्यवदारणैः।
व्रणं पित्तकृतं विद्याद्गन्धः स्रावश्च पूतिकैः॥
बहुपिच्छो गुरुः स्निग्धः स्तिमितो मन्दवेदनः।
पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः॥

रक्तजद्विदोषजत्रिदोषजव्रणानाह—रक्तो रक्तस्रुती रक्ताद् द्वित्रिजः स्यात्तदन्वयैः॥

संसर्ग से दूषित व्रण प्रसरानुसार पन्द्रह प्रकार का होता है। १-वातजव्रण, २-पित्तजव्रण, ३-कफज व्रण, ४-रक्तज व्रण, ५-वातपित्तज व्रण, ६-वातश्लेष्मज व्रण, ७-पित्तश्लेष्मज व्रण, ८-सन्निपातज व्रण, ९-वातरक्तज व्रण, १०-रक्तपित्तज व्रण, ११-श्लेष्मरक्तज व्रण, १२-वातपित्तरक्तज व्रण, १३-वातकफरक्तज व्रण, १४-पित्तकफरक्तज व्रण एवं १५-वातपित्तकफरक्तज व्रण।

विमर्श—शरीर में निज या आगन्तुक कारण से शोथ होकर पकने से तथा भिन्न होने से उसे **'व्रण'** कहते हैं। जो व्रण जिह्वातल सा, कोमल, चिकना, स्निग्ध, कम दर्द वाला, सुव्यवस्थित यानी ऊंचा नीचा रहित और विना स्राव वाला हो उसे **'शुद्ध व्रण'** कहते हैं। इसमें दोषों का प्रसर नहीं होता। जो व्रण **शुद्ध व्रण** के लक्षणों से विपरीत लक्षण वाला, सड़ा हुआ, विविध गन्ध युक्त, पूय और रक्त अधिक मात्रा में स्राव करने वाला, शोथयुक्त और जल्दी आराम न हो रहा हो उसे **'दुष्टव्रण'** कहते हैं। इसमें दोषों का प्रसर अधिक होता है। अन्य दोषयुक्त पंद्रह प्रकार के व्रणों में दोषानुसार वर्ण, गन्ध, पीड़ा और स्राव आदि होते हैं जो विस्तार भय से यहां नहीं कहा गया ॥७२-७५॥

सद्योव्रणभेदाः—**सद्योव्रणस्त्वष्टधा स्यादविक्लृप्तविलम्बितौ।**
छिन्नभिन्नप्रचलिता घृष्टविद्धनिपातिताः ॥ ७६ ॥

सद्योव्रण(१) यानी बाहरी शस्त्र आदि के लगने से तत्काल उत्पन्न व्रण आठ प्रकार का होता है। ये व्रण धारवाले शस्त्र, खुण्डाशस्त्र तथा वजनी लाठी, पत्थर आदि के द्वारा प्रहार

---

(१) आगन्तुजानाह—**नानाधारमुखैः शस्त्रैर्नानास्थाननिपातितैः।**
भवन्ति नानाऽऽकृतयो व्रणास्तांस्तान्निबोध मे ॥

अविक्लृप्तलक्षणम्—**अविक्लृप्तमित्यपकर्त्तनम्।**

विलम्बितलक्षणम्—**विलम्बितो लम्बनशीलः, मांसावलम्बनेनेत्यभिप्रायः।**

छिन्नलक्षणम्—**तिर्यक्छिन्न ऋजुर्वाऽपि यो व्रणस्त्वायतो भवेत्।**
गात्रस्य पातनं चापि छिन्नमित्यभिधीयते ॥

भिन्नलक्षणम्—**शक्तिकुन्तेषुखड्गाग्रविषाणैराशयो हतः।**
यत् किञ्चित् प्रस्रवेत्तद्धि भिन्नलक्षणमुच्यते ॥

निपातितक्षतजयोर्लक्षणे-**नातिच्छिन्नं नातिभिन्नमुभयोर्लक्षणान्वितम्।**
विषमं व्रणमङ्गेषु तत्क्षतं त्वभिनिर्दिशेत् ॥

घृष्टलक्षणम्—**घर्षणादभिघाताद्वा यदङ्गं विगतत्वचम्।**
ऊषास्रावान्वितं तत्तु घृष्टमित्यभिधीयते ॥

विद्धलक्षणम्—**सूक्ष्मास्यशल्याभिहतं यदङ्गं त्वाशयं विना।**
उत्तुण्डितं निर्गतं च तद्विद्धमिति निर्दिशेत् ॥

प्रचलित (पिचित) लक्षणम्— **प्रहारपीडनाभ्यां तु यदङ्गं पृथुतां गतम्।**
सास्थि तत् पिच्चितं विद्यान्मज्जारक्तपरिप्लुतम् ॥

करने से एवम् अङ्ग को किस प्रकार कितनी क्षति पहुँची है, इस भेद से व्रण का आठ भेद चिकित्सार्थ कहा गया है। १–अविक्लृप्त, २–विलम्बित, ३–छिन्न, ४–भिन्न, ५–प्रचलित, ६–घृष्ट, ७–विद्ध और ८–निपातित।

विमर्श–जो व्रण चीरा सा लगा हुआ हो उसे **अविक्लृप्त** कहते हैं। जिस व्रण में मांस लटके पड़ते हैं उसे **विलम्बित** कहते हैं। जो व्रण सीधा या टेढ़ा प्रहार से जनित हो और अंग की कोई शाखा कट कर अलग हो गयी हो तो उसे **छिन्न व्रण** कहते हैं। नोकदार भाला आदि के किसी आशय में लगने से फट कर भीतर के पदार्थ बहने लगते हैं, उसे भिन्न या फटा व्रण कहते हैं। **प्रचलित व्रण** उसे कहते हैं जो वजनदार खुण्डे शस्त्र या मुगदर आदि के लगने से हड्डी तक फट कर मज्जा और रक्त निकल पड़ते हैं। बाहर से रगड़ खाने से चमड़ा निकल जाने पर जलन और पानी सा स्राव होने वाले व्रण को **घृष्ट व्रण** कहते हैं। सूक्ष्म शस्त्र के द्वारा आशयहीन स्थान यानी पेशी आदि पर छिद जाने से जो व्रण होता है वह विद्ध **व्रण** है। जो व्रण न अधिक छिन्न और न अधिक भिन्न ही हो वरन उभय लक्षण मिले हों उसे **निपातित** या साधारण **क्षत व्रण** कहते हैं। **सुश्रुत** में छिन्न, भिन्न, विद्ध, क्षत, पिच्चित और घृष्ट ये छः प्रकार के ही व्रण कहे गये हैं। अन्य सब प्रकार के व्रण इन्हीं के अन्तर्गत हो जाते हैं। **शार्ङ्गधरजी** ने आकृति अनुसार आठ भेद कह दिया ॥ ७६॥

कोष्ठभेदभेदौ—**कोष्ठभेदो द्विधा प्रोक्तश्छिन्नान्त्रो निःसृतान्त्रकः ॥ ७७॥**

कोष्ठ(१) भेद दो प्रकार का होता है। छिन्नान्त्र और निःसृतान्त्र।

---

(१) कोष्ठलक्षणम्—**स्थानान्यामाग्निपक्कानां मूत्रस्य रुधिरस्य च।**
हृदुण्डुकः फुफ्फुसश्च कोष्ठ इत्यभिधीयते॥
तत्र भेदः—**तस्मिन् भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते।**
मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति॥
मूर्च्छाश्वासतृषाऽऽध्मानमभक्तच्छन्द एव च।
विण्मूत्रवातसङ्गश्च स्वेदास्रावोऽक्षिरक्तता॥
लोहगन्धित्वमास्यस्य गात्रदौर्गन्ध्यमेव च। हृच्छूलं पार्श्वयोश्चापि विशेषं चात्र
आमाशयपक्वाशयस्थि-**आमाशयस्थे रुधिरे रुधिरं छर्दयत्यपि।**
तरक्तयोर्लक्षणे— **आध्मानमतिमात्रं च शूलं च भृशदारुणम्॥**
पक्वाशयगते चापि रुजा गौरवमेव च। अधः काये विशेषेण शीतता च भवेदिह
कोष्ठभेदमाह—**त्वचोऽतीत्य शिरादीनि भित्त्वा वा परिहृत्य वा।**
कोष्ठे प्रतिष्ठितं शल्यं कुर्यादुक्तानुपद्रवान्॥
व्रणानामुपद्रवानाह—**विसर्पः पक्षघातश्च शिरास्तम्भोऽपतानकः।**
मोहोन्मादव्रणरुजो ज्वरस्तृष्णा हनुग्रहः॥
कासश्छर्दिरतीसारो हिक्का श्वासः सवेपथुः। षोडशोपद्रवाः प्रोक्ता व्रणानां व्रणचि

विमर्श—जिस भिन्नव्रण में अन्दर ही या बाहर आंतें कट जायँ वह **छिन्नान्त्र** और जिसमें सिर्फ उदर प्राचीर के फटने से आँतें केवल बाहर निकल पड़ें वह **निःसृतान्त्र** कोष्ठभेद है। **कोष्ठ** शब्द से यद्यपि आमाशय, पक्वाशय, अग्न्याशय, मूत्राशय, रक्ताशय, हृदय, उण्डुक और फुफ्फुस का ग्रहण होता हैं। जिनका सामान्य लक्षण ऊपर भिन्न लक्षण में कह आये हैं, तथापि यह **कोष्ठ** शब्द सिर्फ उदर मात्र का बोधक है जिसमें अँतड़ियाँ रहती हैं। यहां यह विशिष्ट लक्षण कहा गया, अतः कोई दोष नहीं ॥ ७७ ॥

अस्थिभङ्गभेदाः–**अस्थिभङ्गोऽष्टधा प्रोक्तो भग्नपृष्ठविदारितौ ।**
विवर्त्तितश्च विश्लिष्टस्तिर्यक् क्षिप्तस्त्वधो गतः।ऊर्ध्वगः संधिभग्नश्च…७८

अस्थि भङ्ग (१)रोग आठ प्रकार का होता है। १–भग्नपृष्ठ, २–विदारित, ३–विवर्त्तित, ४–विश्लिष्ट, ५–तिर्यक्क्षिप्त, ६–अधोगत, ७–ऊर्ध्वग और ८–सन्धिभग्न।

(१) भग्नाधिकारः—अस्थिभङ्गपर्यायवाचको भग्न इत्यत्र कथितः, न तु भग्नशब्दोऽष्टसंख्यायामिह गणितः, ते तु 'पिष्टविदारितादयोऽष्टौ गणिताः, अग्निवेशेन तु भग्नं द्विविधं काण्डसन्धिभेदात्। यदुक्तं—

भग्नं समासाद् द्विविधं हुताश! काण्डे च सन्धावपि तत्र सन्धौ।
सन्धिभग्नलक्षणम्—**उत्पिष्टविश्लिष्टविवर्त्तितञ्च तिर्यग्गतं क्षिप्तमधश्च षोढा ॥**
सन्धिभग्नस्य विशेषसा-**प्रसारणाकुञ्चनवर्त्तनोग्रा रुक् स्पर्शविद्वेषणमेतदुक्तम् ।**
मान्यभेदौ—**सामान्यतः सन्धिगतस्य लिङ्गमुत्पिष्टसन्धेः श्वयथुः समन्तात् ।**
विशेषतो रात्रिभवा रुजश्च विश्लिष्टजे तौ च रुजा च नित्यम् ॥
विवर्त्तिते पार्श्वरुजश्च तीव्रास्तिर्यग्गते तीव्ररुजो भवन्ति ।
क्षिप्तेऽतिशूलं विषमत्वमस्थ्नोः क्षिप्ते त्वधो रुग्विघटश्च सन्धेः ॥
काण्डभग्नभेदाः—**काण्डे त्वतः कर्कटकाश्वकर्णविचूर्णितं पिच्चितमस्थिछल्लिका ।**
काण्डेषु भग्नं ह्यतिपातितं च मज्जागतं च स्फुटितं च वक्रम् ॥
छिन्नं द्विधा द्वादशधाऽपि काण्डे ।
लक्षणम्—**स्रस्ताङ्गता शोफरुजाऽतिवृद्धिः ।**
सम्पीडयमाने भवतीह शब्दः स्पर्शासहस्पन्दनतोदशूलाः ।
सर्वास्ववस्थासु न शर्मलाभो भग्नस्य काण्डे खलु चिह्नमेतत् ॥
काण्डभग्नस्य द्वादशप्रकारादप्यधिकत्वम्—
भग्नं तु काण्डे बहुधा प्रयाति समासतो नामभिरेव तुल्यम् ।
कष्टसाध्यता—**अल्पाशिनोऽनात्मवतो जन्तोर्वातात्मकस्य च ।**
उपद्रवैर्वा जुष्टस्य भग्नं कृच्छ्रेण सिद्ध्यति ॥
असाध्यतामाह—**भिन्नं कपालं कट्यां तु सन्धिमुक्तं तथा च्युतम् ।**
जघनं प्रतिपिष्टं च वर्जयेत्त विचक्षणः ॥

विमर्श—भग्नपृष्ठ में हड्डी के ऊपरी हिस्से से छिलका सा चटकता है। **विदारित** में हड्डी फट जाती है। **विवर्त्तित** में हड्डी झुककर उलट जाती है। **विश्लिष्ट** में संधि से अलग हो जाती है। **तिर्य्यक्क्षिप्त** में हड्डियाँ संधि से अलग हो कर तिरछी चली जाती हैं। **अधोगत** में एक हड्डी दूसरी हड्डी के नीचे चली जाती है। उसी प्रकार **उद्ध्वग** में ऊपर चली जाती है। **संधिभग्न** में संधि वियुक्त हो जाती है। यहां भग्न का बिलकुल संक्षिप्त विवरण दिया गया है, क्योंकि **संहिता** कायचिकित्सा प्रधान है। अन्यत्र **भग्न** को दो विभाग में बाँटा गया है। १-**काण्डभग्न** और २-**संधिभग्न**। **काण्डभग्न** बारह प्रकार का होता है। १-कर्कट, २-अश्वकर्ण, ३-विचूर्णित, ४-पिच्चित, ५-अस्थिछल्लिका, ६-काण्डभग्न, ७-अति-पातित, ८-मज्जागत, ९-स्फुटित, १०-वक्र, ११-ईषच्छिन्न और १२-संपूर्णच्छिन्न। **संधिभग्न** छः प्रकार का होता है, यथा-१-उत्पिष्ट, २-विश्लिष्ट, ३-विवर्त्तित, ४-तिर्य्यग्गत, ५-... और ६-अधोगत ॥ ७८ ॥

वह्निदग्धभेदाः—······**वह्निदग्धश्चतुर्विधः।**

प्लुष्टो विदग्धो दुर्दग्धः सम्यग्दग्धः प्रकीर्त्तितः ॥ ७९ ॥

वह्निदग्ध(१) यानी आग से जलना चार प्रकार का होता है। १-प्लुष्ट, २-विदग्ध, ३-दुर्दग्ध और ४-सम्यग्दग्ध।

अस्थिविशेषेण भग्नवि-**तरुणास्थीनि नम्यन्ते भिद्यन्ते नलकानि तु।**
शेषमाह—**कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च ॥**

अथोक्तपिष्टविदारितादीनां विवरणमाह—

सन्धावुभयतः शोथो वेदनादिकश्च १पिष्टसंज्ञः। २विदारित इति द्वयोः सन्ध्योरतिक्रान्तता वेदना च ॥ ३विवर्त्तित इत्येकसन्धिपार्श्वगमनं विषमाङ्गता वेदना च। ४विश्लिष्ट इति मनाक् सन्धिविश्लेषः शिथिलतामात्रं रात्रिरुजाशोथौ च। ५तिर्यक्क्षिप्त इत्येकं सन्ध्यस्थिस्थानं त्यक्त्वा तिर्यग् याति तदा तीव्रपीडा। ६अधोगत इति। वक्ष्यमाणोर्ध्वगलक्षणः। किञ्चिदधोगमनमिति शेषः। ७ऊर्ध्वग इति विषमा रुगप्यस्थ्नोरतिक्षिप्तत्वात्, तेन द्वयोरप्यस्थ्नोः परस्परातिक्रमणं दृश्यत इत्यर्थः। ८सन्धिभग्न इति द्वयोः सन्धानं सन्धेस्तु विश्लेषः सन्धिभग्नः कथ्यते।

(१) अग्निदग्धनि-**तत्राग्निर्द्विविधो ज्ञेयः स्नेहरूक्षसमाश्रितः।**
दानम्—**स्नेहदग्धं तु तैलादि रूक्षं लौहादि कथ्यते ॥**
तस्य भेदो लक्षणञ्च—**अग्निदग्धं चतुर्द्धा स्यात्प्लुष्टं दुर्दग्धमेव च।**
सम्यग्दग्धं तथा तीव्रदग्धं च परिकीर्त्तितम् ॥

यद् विवर्णमतिप्लुष्टं तत्प्लुष्टमभिधीयते। तीव्रदाहव्यथावन्तो यत्र स्फोटा भवन्ति चिरेण ते प्रशाम्यन्ति ते दुर्दग्धमुदाहृतम्। ताम्रवर्णमगम्भीरं दाहपीडासमन्वितम् सुसंस्थितं च कथितं सम्यग्दग्धं भिषग्वरः। त्वग्मांसं यत्र दग्धं स्याद् विश्लेषो वा

विमर्श—अङ्ग के झुलस जाने को **प्लुष्ट** कहते हैं। इसमें त्वक् में राग, ईषत् दाह और थ होते हैं। **अवभासिनी** त्वचा पीछे से उचट जाती है। **विदग्ध** में स्थान इतना जल ता है कि–त्वक्, मांस, मेद, शिरा, स्नायु और हड्डियाँ तक जल जाती हैं। इसमें वर, दाह, तृषा, मूर्च्छा आदि उपद्रव होते हैं। **दुर्दग्ध** में दग्धस्थान में फोड़े पड़ ते हैं, दाह और वेदना अधिक होती है और शीघ्र अच्छा नहीं होता। **सम्यग्** ग्ध में चिकित्सक आवश्यकतानुसार स्थान को दग्ध करता है। यह गहरा नहीं होता तथा लफल जैसा वर्णका होता है। यह अधिक कष्ट नहीं देता तथा शीघ्र अच्छा हो जाता है। ये ग्धरोग चिकित्सक की गलती से या दैवयोग से होते हैं॥ ७९॥

डीव्रणभेदाः—**नाड्यः पञ्च समाख्याता वातपित्तकफैस्त्रिधा। त्रिदोषैरपि शल्येन···॥८०॥**

नाडीव्रण (१) या नासूर पाँच प्रकार का होता है १–वातिक, २–पैत्तिक, ३–श्लैष्मिक, ४–सान्निपातिक तथा ५–शल्यनिमित्तज।

विमर्श—जो पुरुष पक्व शोथ को अपक्व कह कर तथा पूयपूर्ण व्रण की भय आदि से पेक्षा करता है–शोधन नहीं करता, उसके शरीर के अन्दर पूय मांसादि को गलाकर नाली सा बना देता है और उसी में से बहने लगता है। इसीसे इसे नालीवाव, नाडीव्रण या **नासूर** कहते हैं। **वातिक नासूर** का मुख सूक्ष्म होता है तथा शूल होता रहता है। इसमें से प्रायः रात को फेनिल पूय निकला करता है। **पित्तज नासूर** ज्वर, दाह और तृषा उत्पन्न करता है। इसमें प्रायः दिन को पीला, गर्म और तीक्ष्ण स्राव होता है। **कफज नासूर** से रातको प्रायः अधि-

---

रास्नाय्वस्थिसन्धीनां वधस्तदतिदग्धकम्। अत्यर्थं वेदना दाहो ज्वरस्तृण्मूर्च्छया सह।
स्याद् व्रणस्तु चिराद् रोहेद् रूढो याति विवर्णताम्॥

(१) नाडीव्रणनिदानम्—

यः शोथमाममतिपक्वमुपेक्षतेऽज्ञो यो वा व्रणं प्रचुरपूयमसाधुवृत्तः।
अभ्यन्तरं प्रविशति प्रविदार्य तस्य स्थानानि पूर्वविहितानि ततः सपूयः॥
तस्यातिमात्रगमनाद्गतिरिष्यते तु नाडीव यद् वहति तेन मता तु नाडी॥

तत्र वातादिभेदेन लक्षणानि—

तत्रानिलात्परुषसूक्ष्ममुखी सशूला फेनानुविद्धमधिकं वहति क्षपासु।
पित्तात्तृषाज्वरकरी परिदाहयुक्ता पीतं स्रवत्यधिकमुष्णमहःसु चापि॥
ेया कफाद् बहुघनार्जुनपिच्छिलास्रा स्तब्धा सकण्डुररुजा रजनीप्रवृद्धा।
ोषद्वयाभिहितलक्षणदर्शनेन तिस्रो गतीर्व्यतिकरप्रभवास्तु विद्यात्॥
दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा यस्यां भवन्त्यभिहितानि च लक्षणानि।
तामादिशेत् पवनपित्तकफप्रकोपाद् घोरामसुक्षयकरीमिव कालरात्रिम्॥
नष्टं कथं चिदनुमार्गनिपीडितेषु स्थानेषु शल्यमचिरेण गतिं करोति।
सा फेनिलं मथितमुष्णमसृग्विमिश्रं स्रावं करोति सहसा सरुजं च नित्यम्॥
नाडी त्रिदोषप्रभवा न सिद्ध्येच्छेषाश्चतस्रः खलुः यत्नसाध्याः।

क श्वेत और पिच्छिल स्राव होता है, यह स्तब्ध, कण्डुर और मन्द दर्द वाला होता है। ... में इसकी पीड़ा बढ़ जाती है। **त्रिदोषज नाडी** में उपर्युक्त सब लक्षण होते हैं तथा दाह, ... श्वास, मूर्च्छा, मुखशोष आदि भयङ्कर उपद्रव होते हैं। यह प्राणनाशक है। नोकदार पतले ... के शरीर के अन्दर गुम हो जाने से भी **नासूर** हो जाता है। इसमें अङ्ग संचालन के समय ... होती है तथा अकस्मात् ही इससे मथा हुआ सा, उष्ण और रक्तमिश्रित घाव होता है॥ ...

भगन्दरभेदाः—·········**तथाऽष्टौ स्युर्भगन्दराः।**

शतपोनस्तु पवनादुष्ट्रग्रीवश्च पित्ततः। परिस्रावी कफाज्ज्ञेय ऋजुर्वातकफोद्भवः। परिक्षेपी मरुत्पित्तादर्शोजः कफपित्ततः। आगन्तुजातश्चोन्मार्गी शङ्खावर्तस्त्रिदोषतः॥

भगन्दर (१)रोग आठ प्रकार का होता है १–वात से **शतपोनक** भगन्दर, २–पित्त से **उष्ट्रग्रीव**, ३–कफ से **परिस्रावी** भगन्दर, ४–वातकफ से **ऋजु** भगन्दर, ५–वातपित्त से **परिक्षेपी** भगन्दर, ६–कफपित्त से **अर्शोज** भगन्दर, ७–आगन्तुशल्य से **आगन्तुक** भगन्दर, ८–त्रिदोष से शङ्खावर्त्त भगन्दर होता है। गुदा और अण्डकोष के मध्य भाग में शोथ होकर ...

---

(१) भगन्दरस्य पूर्वरूपसहितं रूपम्—

कटीकपालनिस्तोददाहकण्डूरुजाऽऽदयः। भवन्ति पूर्वरूपाणि भविष्यति भगन्दरे। गुदस्य द्व्यङ्गुले क्षेत्रे पार्श्वतः पिडिकाऽऽर्त्तिकृत्। भिन्ना भगन्दरो ज्ञेयः स च पञ्चविधो ... भगं परिसमन्ताच्च गुदं बस्तिं तथैव च। भगवद्दारयेद् यस्मात् तस्माज्ज्ञेयो भगन्दरः॥

वातिकशतपोनकलक्षणम्—**कषायरूक्षैरतिकोपितोऽनिलस्त्वपानदेशे पिडकां करोति याम्। उपेक्षणात्पाकमुपैति दारुणां रुजां च भिन्नाऽरुणफेनवाहिनी। तत्रागमो मूत्रपुरीषरेतसां व्रणैरनेकैः शतपोनकं वदेत्॥**

पैत्तिकमुष्ट्रग्रीवकमाह—**प्रकोपणैः पित्तमतीव कोपितं करोति रक्तां पिडिकां गुदाश्रिताम्। तदाशुपाकाऽहिमपूयवाहिनीं भगन्दरं तूष्ट्रशिरोधरं वदेत्॥**

कफजं परिस्राविणमाह—**कण्डूयनो घनस्रावी कठिनो मन्दवेदनः। श्वेतावभासः कफजः परिस्रावी भगन्दरः॥**

ऋजुः—**ऋजुर्वातकफोद्भव इति वातकफलक्षणाभ्यां युक्त ऋजुः॥**

परिक्षेपी—**मरुत्पित्तादिति वातपित्तलक्षणाभ्यां युक्तः परिक्षेपीति॥**

अर्शोजः—**अर्शोजः कफपित्तत इति कफपित्तचिह्नाभ्यां मिलितोऽर्शोज इत्यर्शोभगन्दरः। कफपित्ते सपूर्वोत्थे दुर्नामासृजकोपतः। अर्शोमूले ततः शोथं कण्डूदाहादिमान् भवेत्। स शीघ्रपक्वभिन्नास्यः क्लेदयन् मूलमर्शसः। स्रवन्त्यजस्रं च पूतिरयमर्शोभगन्दरः॥**

क्षतजमुन्मार्गिलक्षणम्—**क्षताद्गतिः पायुगता विवर्द्धते ह्युपेक्षणात्स्युः कृमयो विदार्य ते। प्रकुर्वते मार्गमनेकधामुखव्रणैस्तदुन्मार्गिभगन्दरं वदेत्॥**

सन्निपातजं शम्बूकाव-र्त्तमाह—**बहुवर्णरुजास्रावा पिडिका गोस्तनोपमा। शम्बूकावर्त्तवन्नाडी शम्बूकावर्त्तको मतः॥**

कर फूट जाता है। **भग** यानी योनि की तरह फटने के कारण इसे **भगन्दर** कहते हैं। **वातिक भगन्दर** चलनी सा अनेक छिद्र वाला होने से उसे **शतपोनक** कहते हैं। **पित्तज भगन्दर** ऊँट के गले के जैसा टेढ़ा मार्ग वाला होने से **उष्ट्रग्रीव** कहते हैं। **कफज भगन्दर** अधिक स्राव वाला होने से **परिस्रावी** कहते हैं। **वातकफज** भगन्दर सीधा मार्ग का होता है अतः **ऋजु** कहते हैं। **वातपित्तज भगन्दर** स्राव को परिक्षिप्त करता है, अतः **परिक्षेपी** कहा जाता है। **कफपित्तज भगन्दर** अर्शोरोग से उत्पन्न होता है अतः उसे **अर्शोज** कहते हैं। शल्यकर्तृक उन्मार्ग प्रवृत्त होने से आगन्तुक भगन्दर को **उन्मार्गी** कहते हैं तथा शंख के आवर्त्त के समान स्रावमार्ग होने के कारण त्रिदोषज भगन्दर को **शङ्खावर्त्त** नाम दिया गया है ॥ ८१ ॥

उपदंशभेदाः—**मेढ्रे पञ्चोपदंशाः स्युर्वातपित्तकफैस्त्रिधा। सन्निपातेन रक्ताच्च**···॥८२॥

मेढ्र यानी **लिङ्गेन्द्रिय** पर उपदंश(१) रोग पांच प्रकार का होता है। १–वातिक, २–पैत्तिक, ३–श्लैष्मिक ४–सान्निपातिक और ५–रक्तज।

विमर्श— हाथ के अभिघात से, नख–दांत आदि के लगने से, अधिक और बेकायदे मैथुन करने से तथा दुष्टयोनि, पशु, अयोनि आदि गमन से शिश्न पर घाव हो जाते हैं, उन्हें **उपदंश** कहते हैं। उपेक्षा करने से इसमें कृमि उत्पन्न हो जाते हैं तथा शिश्न भी गलजाता है। कोई कोई उपदंश का **योनि में** होना भी मानते हैं पर साधारणतया शिश्न पर के व्रण की ही उपदंश संज्ञा रूढ हो गई है। आज कल कोई कोई **उपदंश से** प्रचलित फिरंग रोग का ही ग्रहण करते हैं, यह प्रामादिक है। उपदंश उपर्युक्त कारणों से होता है पर फिरंग विषजन्य होता है। उपदंश प्रायः शारीर दोष से ही होता है पर **फिरंग** आगन्तुक है। उपदंश संक्रामक नहीं है पर फिरंग संक्रामक है। यह फिरंग वाली स्त्री के सहवास से, फिरंग वाले के मूत्र के ऊपर पेशाब करने से तथा उसके कपड़े आदि के संसर्ग से ही उत्पन्न होता है। उपदंश केवल शिश्न मात्र में ही सीमित रहता है, पर फिरंगविष सारे शरीर में फूट निकलता है। उपदंश से फिरंग का परिणाम भयंकर होता है। इससे आक्रान्त पुरुष को अनेक रोग–**नासाभङ्ग, दृष्टिमान्द्य** आदि हो जाते हैं तथा सन्तान में भी यह संक्रमित हो जाता है। फिरंग का चिकित्साक्रम भी उपदंश से भिन्न है। अतः कारण, रूप, संप्राप्ति, चिकित्साक्रम तथा भावी परिणामों की भिन्नता होने से उत्पत्ति स्थल एक होने पर भी ये दो रोग सर्वथा भिन्न हैं ॥ ८२ ॥

शूकामयभेदाः—······**मेढ्रे शूकामयास्तथा।**
चतुर्विंशतिराख्याता लिङ्गार्शो ग्रथितं तथा ॥ ८३ ॥

---

(१) उपदंशनिदानम्—**हस्ताभिघातान्नखदन्तपाताद्धावनाद्दत्यतिसेवनाद्वा।**
योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधापचारैः ॥
वातादिभेदेन लक्षणानि—**सतोदभेदैः स्फुरणैः सकृष्णैः स्फोटैर्व्यवस्येत्पवनोपदंशम्।**
पीतैर्बहुक्लेदयुतैः सदाहैः पित्तेन रक्तात् पिशितावभासैः ॥
सकण्डुरैः शोफयुतैर्महद्भिः शुक्लैर्घनैः स्रावयुतैः कफेन।
नानाविधस्रावरुजोपपन्नमसाध्यमाहुस्त्रिमलोपदंशम् ॥

निवृत्तमवमन्थश्च मृदितं शतपोनकः । अष्ठीलिका सर्षपिका त्वक्पाकश्चावपाटिका ।
मांसपाकः स्पर्शहानिर्निरुद्धमणिरुत्तमा । मांसार्बुदं पुष्करिका संमूढपिटिकाऽलजी ।
रक्तार्बुदं विद्रधिश्च कुम्भिका तिलकालकः । निरुद्धप्रकशः प्रोक्तस्तथैव परिवर्त्तिका ।

मेढ्र यानी लिङ्गेन्द्रिय में चौबीस प्रकार के **शूक रोग** (१)होते हैं। १-लिङ्गार्श, २-...

---

(१) शूकदोषनिदानम्—अक्रमाच्छेफसो वृद्धिं योऽभिवाञ्छति मूढधीः ।
व्याधयस्तस्य जायन्ते दश चाष्टौ च शूकजाः ॥

लिङ्गवर्त्ति (लिङ्गार्शो) लक्षणम्—
अङ्कुरैरिव सञ्जातैरुपर्युपरि संस्थितैः । क्रमेण जायते वर्त्तिस्ताम्रचूडशिखोपमा ॥
कोशस्याभ्यन्तरे सन्धौ पर्वसन्धिगताऽपि वा । कुलत्थाकृतयः के चित्के चित्पद्मदलो...
मेढ्रसन्धौ नृणां के चित्के चित्सर्वाश्रयाः स्मृताः ।
रुजादाहार्त्तिबहुलास्तृष्णातोदसमन्विताः ॥
स्त्रीणां पुंसां च जायन्ते ह्युपदंशाः सुदारुणाः ।
लिङ्गवर्त्तिरिति ख्याता लिङ्गार्श इति चापरे ॥
सवेदना पिच्छिला च दुश्चिकित्स्या त्रिदोषजा ॥

ग्रथितस्य लक्षणम्—शूकैर्यत् पूरितं शश्वद् ग्रथितं नाम तत्कफात् ।
निवृत्तलक्षणम्—विमर्दनादिदुष्टेन वायुना चर्ममेढ्रजम् ।
निवर्त्तते सरुग्दाहं त्वचि पाकं च गच्छति ॥
पिण्डितं ग्रथितं चर्म तत्प्रलम्बमथो मणेः । निवृत्तसंज्ञः स भवेत् कण्डूकाठिन्यवर्जि...
अवमन्थलक्षणम्—दीर्घा बह्वयश्च पिडका दीर्यन्ते मध्यतस्तथा ।
सोऽवमन्थः कफासृग्भ्यां वेदनारोमहर्षकृत् ॥
मृदितलक्षणम्—मृदितं पीडितं यत्तु संरब्धं वातकोपतः ।
शतपोनकलक्षणम्—छिद्रैरणुमुखैर्लिङ्गं चितं यत्तु समन्ततः ।
वातशोणितजो व्याधिः स ज्ञेयः शतपोनकः ॥
अष्ठीलालक्षणम्—कठिना विषमैर्भुग्नैर्वायुनाऽष्ठीलिका भवेत् ।
सर्षपिकालक्षणम्—गौरसर्षपसंस्थाना शूकदुर्भुग्नहेतुका ।
पिडका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका तु सा ॥
अवपाटिकालक्षणम्—वातपित्तकृतो ज्ञेयस्त्वक्पाको ज्वरदाहकृत् ।
त्वक्पाकलक्षणम्—अल्पीयःखां यदा हर्षाद्बलाद्गच्छेत् स्त्रियं नरः ।
हस्ताभिघातादपि वा चर्मण्युद्वर्त्तिते बलात् ॥
यस्यावपाट्यते चर्म तां विद्यादवपाटिकाम् । सकण्डूः कठिना चापि सैव श्लेष्मसमु...
मांसपाकलक्षणम्—शीर्यन्ते यस्य मांसानि यस्य सर्वाश्च वेदनाः ।
विद्यात्तं मांसपाकं तु सर्वदोषकृतं भिषक् ॥

३–निवृत्त, ४–अवमन्थ, ५–मृदित, ६–शतपोनक, ७–अष्ठीलिका, ८–सर्षपिका, ९–त्वक्पाक, १०–अवपाटिका ११–मांसपाक, १२–स्पर्शहानि, १३–निरुद्धमणि, १४–उत्तमा, १५–मांसार्बुद, १६–पुष्करिका, १७ संमूढपिडिका, १८–अलजी, १९–रक्तार्बुद, २०–विद्रधि, २१–कुम्भिका, २२ तिलकालक, २३ निरुद्धप्रकश एवं २४–परिवर्त्तिका ।

विमर्श–पूर्वकाल में लिङ्गवृद्धि के लिये जलशूकों का प्रयोग किया जाता था। वात्सायनादि

स्पर्शहानिलक्षणम्—स्पर्शहानिं तु जनयेच्छोणितं शूकदूषितम् ।

निरुद्धमणिलक्षणम्—वातेन दूषितं चर्म मणौ सक्तं रुणद्धि चेत् ।
स्रोतो मूत्रं ततो भेत्ति मन्दधारं सवेदनम् ॥
मणेर्विकाराद्रोधश्च निरुद्धमणिरुच्यते ।

मांसार्बुदलक्षणम्—मांसदोषेण जानीयादर्बुदं मांससम्भवम् ।

उत्तमालक्षणम्—मुद्गमाषोपमा रक्ता रक्तपित्तोद्भवा च या ।
व्याधिरेषोत्तमा नाम शूकाजीर्णनिमित्तजा ॥

पुष्करिकालक्षणम्—पिडिका पिडकायुक्ता पित्तशोणितसम्भवा ।
पद्मकर्णिकसंस्थाना ज्ञेया पुष्करिका तु सा ॥

संमूढपिडकालक्षणम्–पाणिभ्यां भृशसम्मूढे सम्मूढपिडिका भवेत् ।

अलजीलक्षणम्—तुल्यजां त्वलजीं विद्याद्यथाप्रोक्तां विचक्षणः ।

रक्तार्बुदलक्षणम्—कृष्णैः स्फोटैः सरक्ताभिः पिडकाभिर्निपीडितम् ।
यस्य वातरुजश्चोग्रा ज्ञेयं तच्छोणितार्बुदम् ॥

विद्रधिलक्षणम्—विद्रधिं सन्निपातेन यथोक्तमिति निर्दिशेत् ॥

कुम्भिकालक्षणम्—कुम्भिका रक्तपित्तोत्था जाम्बवास्थिनिभाऽशुभा ॥

तिलकालकलक्षणम्—कृष्णानि चित्राण्यथवा शूकानि सविषाणि वा ।
यानि तानि पचन्त्याशु मेढ्रं निरवशेषतः ॥
कालानि भूत्वा मांसानि शीर्यन्ते यस्य देहिनः ।
सन्निपातसमुत्थांस्तु तान् विद्यात्तिलकालकान् ॥

निरुद्धप्रकशलक्षणम्–वातोपसृष्टे मेढ्रे तु चर्म संश्रयते मणिम् ।
मणिश्चर्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च ॥
निरुद्धप्रकशे तस्मिन् मन्दधारमवेदनम् । मूत्रं प्रवर्त्तते जन्तोर्मणिर्विव्रियते न च ॥
निरुद्धप्रकशं विद्यात् सरुजं वातसम्भवम् ।

परिवर्त्तिकालक्षणम्—मणेरधस्तात् कोशस्तु ग्रन्थिरूपेण लम्बते ।
परिवर्त्तिकां तु तां विद्यात् सरुजं वातसम्भवाम् ॥

असाध्यानाह—तत्र मांसार्बुदं यच्च मांसपाकश्च यः स्मृतः ।
विद्रधिश्च न सिद्ध्यन्ति ये च स्युस्तिलकालकाः ॥

कामशास्त्रों में इनका प्रयोग दिया गया है। ये शूक कई प्रकार के होते हैं। उनमें से कई सविष एवं कई **निर्विष** होते हैं। **सविष शूकों** के प्रयोग से ही **शूकरोग** उत्पन्न होता है, पर आजकल लोक में इन शास्त्रों का अधिक अध्ययनादि न होने से तथा अनेक प्रकार के तिला आदि निकलने से कोई शूकों को ढूढने की तकलीफ नहीं करता। अतः आजकल **शूकदोष** का लोप हो गया है। ये **शूकरोग** अन्य ग्रन्थों में अष्टादश प्रकार के ही पढ़े गये हैं। यहां पर **लिङ्गार्श, निवृत्त, अवपाटिका, निरुद्धमणि, निरुद्धप्रकश** और **परिवर्त्तिका** अधिक दिया गया है। **लिङ्गार्श** अन्यत्र प्रायः **अर्शरोग** में और शेष पांच **क्षुद्ररोगों** में गणित होते हैं। शूकरोग के लुप्त होने से यहां उनका वर्णन करना भी व्यर्थ ही है। अवशेष के लक्षण संक्षेप में कहते हैं। **लिङ्गार्श**–मणि के मूल में चारो ओर मुर्गे की शिखा जैसी शुष्क अंकुर से एक दूसरे पर निकल आते हैं, इनको **लिङ्गवर्त्ति** या **लिङ्गार्श** कहते हैं। **निवृत्त**–मर्दनादि से कुपित वायु लिङ्ग के चर्म को रुजा दाह के साथ निवर्त्तित कर देता है। मणि का चर्म पिण्डित और ग्रथित होकर ग्रन्थियुक्त होता है तथा पक जाता है। इसे **निवृत्त** कहते हैं। **अवपाटिका**–जब पुरुष कामातुर होकर अल्पवयस्का कन्या या छोटी छिद्र वाली योनि में बलपूर्वक रमण करता है अथवा हस्त आघात आदि प्राप्त होता है तो मणि का चर्म अन्दर से फट सा जाता है और क्लेश होते हैं। यदि सूजकर कठिन और कण्डुयुक्त हो जाय तो कफ का कोप होता है। इसे **अवपाटिका** कहते हैं। **निरुद्धमणि**–वातदूषित मणिचर्म अतिसंकुचित होकर मणि को इतना ढांक करता है कि मूत्र मार्ग प्रायः रुक जाता है। जोर लगाने पर मन्दधार से दर्द सहित मूत्र निकलता है इसको **निरुद्धमणि** रोग कहते हैं। **निरुद्धप्रकश**– वातदूषित मणिचर्म मणि को ढांक कर ही संकुचित होता है अतः मणि नहीं खुलता शेषलक्षण निरुद्धमणि तुल्य होते हैं। इसे **निरुद्धप्रकश** कहते हैं। **परिवर्त्तिका**–मणिचर्म मणि नीचे गांठ सा हो कर बढ़ जाता है। और उसमें दर्द होता रहता है। इसे **परिवर्त्तिका** कहते हैं। ये रोग विना शूक के भी होते हैं॥ ८३–८६ ॥

कुष्ठभेदाः—**कुष्ठान्यष्टादशोक्तानि वातात् कापालिकं भवेत् ।**
पित्तेनोदुम्बरं प्रोक्तं कफान्मण्डलचर्चिके ॥ ८७ ॥
मरुत्पित्ताहृष्यजिह्वं श्लेष्मवाताद्विपादिका ।
तथा सिध्मैककुष्ठं च किटिभं चालसं तथा ॥ ८८ ॥
कफपित्तात्पुनर्द्द्रुः पामा विस्फोटकं तथा ।
महाकुष्ठं चर्मदलं पुण्डरीकं शतारुकम् ॥ ८९ ॥
त्रिदोषः काकणं ज्ञेयं तथाऽन्यच्छिवत्रसंज्ञितम् ।
तथा वातेन पित्तेन श्लेष्मणा च त्रिधा भवेत् ॥ ९० ॥

कुष्ठरोग—(१) अट्ठारह प्रकार के होते हैं। १–**वायु से** कापालिक कुष्ठ, २–पित्त

(१) कुष्ठनिदानम्—**विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च ।**
भजतामागतां छर्दिं वेगांश्चान्यान्प्रतिघ्नताम् ॥

उदुम्बर कुष्ठ, ३-कफ से मण्डल तथा ४-विचर्चिका कुष्ठ, ५-वातपित्त से ऋष्यजिह्व, ६-कफवात से विपादिका, ७-सिध्म, ८-एक कुष्ठ, ९-किटिभ कुष्ठ, तथा १०-अलस-कुष्ठ होता है। और ११-दद्रुकुष्ठ, १२-पामा और १३-विस्फोटक कुष्ठ ये कफपित्त से होते हैं। १४-महाकुष्ठ, १५-चर्मदल, १६-पुण्डरीक, १७-शतारु और १८-काकण कुष्ठ त्रिदोष से उत्पन्न होते हैं।

व्यायामतिसन्तापमतिभुक्त्वा निषेविणाम्।
शीतोष्णलङ्घनाहारान् क्रमं मुक्त्वा निषेविणाम्॥
घर्मश्रमभयार्त्तानां द्रुतं शीताम्बुसेविनाम्। अजीर्णाध्याशिनां चैव पञ्चकर्मापचारिणाम्॥
नवान्नदधिमत्स्यानि लवणाम्लनिषेविणाम्। माषमूलकपिष्टान्नतिलक्षीरगुडाशिनाम्॥
व्यवायं चाप्यजीर्णेऽन्ने निद्रां च भजतां दिवा। विप्रान् गुरून् धर्षयतां पापं कर्म च कुर्वताम्॥
वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमम्बु च। दूषयन्ति स कुष्ठानां सप्तको द्रव्यसङ्ग्रहः॥
अतः कुष्ठानि जायन्ते सप्त चैकादशैव तु॥

वातिककपालकुष्ठलक्षणम्— कृष्णारुणं कपालाभं यद्रूक्षं परुषं तनु।
कपालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम्॥

पैत्तिकमौदुम्बरमाह— त्वग्दाहरागकण्डूभिः परीतं रोमपिञ्जरम्।
उदुम्बरफलाभासं कुष्ठमौदुम्बरं वदेत्॥

कफान्मण्डलं विचर्चिका च— श्वेतं रक्तं स्थिरं स्त्यानं स्निग्धमुत्सन्नमण्डलम्।
कृच्छ्रमन्योऽन्यसंयुक्तं कुष्ठं मण्डलमुच्यते॥
सकण्डूः पिडिका श्यावा बहुस्रावा विचर्चिका।

मरुत्पित्तादृष्यजिह्वम्— कर्कशं रक्तपर्य्यन्तमन्तः श्यावं सवेदनम्।
यद् ऋष्यजिह्वासंस्थानमृष्यजिह्वं तदुच्यते॥

श्लेष्मवाताद्विपादिका— दोषाः प्रदूष्य त्वङ्मांसपाणिपादसमाश्रिताः।
पिडिका जनयन्त्याशु दाहकण्डूसमन्विताः॥
दह्यते त्वक् खरा रूक्षा पाण्योर्ज्ञेया विचर्चिका।
पादे विपादिका ज्ञेया स्थानान्यत्वाद्विचर्चिका॥

कफपित्तात् सिध्म-किटिभा-लस-दद्रु-पामा-विस्फोटकानि— श्वेतं ताम्रं तनु च यद्रजोघृष्टं विमुञ्चति।
प्रायश्चोरसि तत्सिध्ममलाबुकुसुमोपमम्॥
श्यावं किणखरस्पर्शं परुषं किटिभं स्मृतम्।
कण्डूमद्भिः सरागैश्च गण्डैरलसकं चितम्॥
सकण्डूरागपिडिकं दद्रुमण्डलमुच्यते।
सूक्ष्मा बह्वयः पिडिकाः स्राववत्यः पामेत्युक्ताः कण्डुमत्यः सदाहाः॥
स्फोटाः श्वेतारुणाभासा विस्फोटाः स्युस्तनुत्वचः।

विमर्श—यद्यपि सब प्रकार के कुष्ठ ही **त्रिदोष** तथा **क्रिमिजनित** होते हैं, तथापि दोषों के प्राबल्यानुसार ही व्यपदेश किया गया है। कुष्ठ का ही एक भेद **श्वित्र**-सफेदी **फुलबहरी** होता है। यह भी **त्रिदोषज** ही है पर दोष के उल्वणानुसार वातिक, पैत्तिक और श्लैष्मिक भेद चिकित्सार्थ किया गया है।

विमर्श—यह भी कारण भेद से **दोषज** और **व्रणज** दो प्रकार का होता है। दोषज शारीरिक दोष से होता है तथा **व्रणज**–व्रण के ठीक रोहण न होने से होता है। व्रणज, श्वे

त्रिदोषजाः—महाकुष्ठ–चर्मदल–पुण्डरीक–शतारु–काकणानि—

शीघ्रोत्तरोत्तरधात्ववगाहनबहलदोषजन्यत्वक्रियाभूयस्त्वयोगान्महाकुष्ठमित्युच्यते।
रक्तं सशूलं कण्डूमत्सस्फोटं यद् गलत्यपि। तच्चर्मदलमाख्यातमस्पर्शासहमुच्यते।
सश्वेतं रक्तपर्यन्तं पुण्डरीकदलोपमम्। सोत्सेधं च सरागं च पुण्डरीकं प्रचक्षते॥
रक्तं श्यावं सदाहार्त्ति शतारुः स्याद् बहुव्रणम्। यत्काकणन्तिकावर्णं सपाकं तीव्रवे
त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिध्यति॥

श्वित्रकिलासयोर्निदानम्—कुष्ठैकसम्भवं श्वित्रं किलासं चारुणं भवेत्।
निर्दिष्टमपरिस्रावि त्रिधा तूद्भवसंश्रयम्॥

अनयोर्वातादिलक्षणम्—वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत्।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु॥
सकण्डुरं क्रमाद्रक्तमांसमेदःसु चादिशेत्। वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरम्।

अन्यच्च—अरुणं तत्तु विज्ञेयं मांसधातुसमाश्रितम्।
मेदःश्रितं भवेच्छ्वित्रं दारुणं रक्तसंश्रयम्॥
तच्छ्वित्रं द्विविधमित्याचक्षते। व्रणजं दोषजं च।
श्वित्रं तु द्विविधं विद्याद्दोषजं व्रणजं तथा॥
तत्र मिथ्योपचाराद्धि व्रणस्य व्रणजं स्मृतम्। दोषजं द्विविधं प्रोक्तमात्मजं परजं त
परसंस्कारसंस्पर्शाद् यत्तत् परजमुच्यते। तदात्मजं विजानीयाद् यद्देहेष्वनिलात्म

साध्यासाध्यलक्षणे—अशुक्लरोमबहुलमसंश्लिष्टमथो नवम्।
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा।
गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम्। वर्जनीयं विशेषेण किलासं सिद्धिमिच्छ

अथैककुष्ठचर्मकुष्ठयोर्लक्षणे—अस्वेदनं महावास्तु यन्मत्स्यशकलोपमम्।
तदेककुष्ठं चर्माख्यं बहलं हस्तिचर्मवत्॥

कुष्ठस्य संसर्गजत्वप्रसङ्गेनान्यानपि संसर्गजान् रोगानाह—प्रसङ्गाद् गात्रसंस्पर्शान्निःश्वासात्सहभोजनात्।
एकशय्याऽऽसनाच्चापि वस्त्रमाल्यानुलेपनात्॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्॥

दग्ध से उत्पन्न, ओठ तथा हाथ और पाँव के तलुवों में उत्पन्न **श्वित्र असाध्य** है। **भोजने** शरीरज श्वित्र को भी **आत्मज** और **परज** भेद से दो प्रकार का माना है। **आत्मज** जो खुद शरीर में ही उत्पन्न हो और **परज** दूसरे से जो संक्रमित हो, ऐसा माना है। पर **पाश्चात्त्य चिकित्सकों** ने परीक्षा करके यह मत स्थिर किया है कि **श्वित्र रोग** अन्य कुष्ठों की तरह स्पर्शादि से संक्रमित नहीं होता ॥८७–९०॥

क्षुद्ररोगभेदाः—**क्षुद्ररोगाः षष्टिसंख्यास्तेष्वादौ शर्करार्बुदम् ।**
इन्द्रवृद्धा पनसिका विवृताऽन्धालजी तथा ॥ ९१ ॥
वराहदंष्ट्रो वल्मीकं कच्छपी तिलकालकः।गर्दभी रकसा चैव यवप्रख्या विदारिका॥९२॥
कदरं मषकश्चैव नीलिका जालगर्दभः । इरिवेल्ली जतुमणिर्गुदभ्रंशोऽग्निरोहिणी॥९३॥
सन्निरुद्धगुदः कोठः कुनखोऽनुशयी तथा । पद्मिनीकण्टकश्चिप्पमलसो मुखदूषिका॥९४॥
कक्षा वृषणकच्छूश्च गन्धः पाषाणगर्दभः ।
राजिका च तथा व्यङ्गश्चतुर्द्धा परिकीर्त्तितः ॥ ९५ ॥
वातात्पित्तात्कफाद्रक्तादित्युक्तं व्यङ्गलक्षणम् ।
विस्फोटाः क्षुद्ररोगेषु तेऽष्टधा परिकीर्त्तिताः ॥ ९६ ॥
पृथग्दोषैस्त्रयो पृथग्स्त्रिविधः सप्तद्वन्द्वैमोऽस्रजः । अष्टमः सन्निपातेन क्षुद्ररुक्षु मसूरिका॥९७॥
चतुर्दशप्रकारेण त्रिभिर्दोषैस्त्रिधा च सा ।
द्वन्द्वजा त्रिविधा प्रोक्ता सन्निपातेन सप्तमी ॥ ९८ ॥
अष्टमी त्वग्गता ज्ञेया नवमी रक्तजा स्मृता ।
दशमी मांससंजाता चतस्रोऽन्याश्च दुस्तराः ॥
मेदोऽस्थिमज्जाशुक्रस्थाः क्षुद्ररोगा इतीरिताः ॥ ९९ ॥

क्षुद्ररोग साठ प्रकार के होते हैं—१–शर्करार्बुद, २–इन्द्रवृद्धा, ३–पनसिका, ४–विवृता, ५–अन्धालजी, ६–वराहदंष्ट्रा, ७–वल्मीक, ८–कच्छपी, ९–तिलकालक, १०–गर्दभी, ११–रकसा, १२–यवप्रख्या, १३–विदारिका, १४–कदर, १५–मषक, १६–नीलिका, १७–जालगर्दभ, १८–इरिवेल्ली, १९–जतुमणि, २०–गुदभ्रंश, २१–अग्निरोहिणी, २२–सन्निरुद्धगुद, २३–कोठ, २४–कुनख, २५–अनुशयी, २६–पद्मिनीकण्टक, २७–चिप्प, २८–अलस, २९–मुखदूषिका, ३०–कक्षा, ३१–वृषणकच्छु, ३२–गन्ध, ३३–पाषाणगर्दभ, ३४–राजिका, **चार प्रकार के व्यङ्ग** यानी ३५—वातिक व्यङ्ग, ३६–पैत्तिक व्यङ्ग, ३७–श्लैष्मिक व्यङ्ग, ३८–रक्तज व्यङ्ग, और **विस्फोट आठ प्रकार का** यथा–३९–वातिक विस्फोट, ४०–पैत्तिक विस्फोट, ४१–श्लैष्मिक विस्फोट, ४२–वातपैत्तिक विस्फोट, ४३–वातश्लैष्मिक विस्फोट, ४४–पित्तश्लैष्मिक विस्फोट, ४५–रक्तज विस्फोट और ४६–सान्निपातिक विस्फोट, **मसूरिका रोग चौदह प्रकार का** यथा—४७–वातिक मसूरिका, ४८–पैत्तिक मसूरिका, ४९–श्लैष्मिक मसूरिका, ५०–वातपैत्तिक मसूरिका, ५१–वातश्लैष्मिक मसूरिका, ५२–पित्तश्लैष्मिक मसूरिका, ५३–सान्निपातिक मसूरिका, ५४–त्वग्गता मसूरिका, ५५–रक्तजा मसूरिका, ५६–मांसजा

मसूरिका, ५७-मेदोजा मसूरिका और ५८-अस्थिजा मसूरिका, ५९-मज्जस्था मसूरिका ६०-शुक्रस्था मसूरिका। **अन्त के चार मसूरिका दुस्साध्य हैं।** इस प्रकार क्षुद्र रोग साठ भेद हुए।

विमर्श—जो रोग स्वल्प कारण से उत्पन्न होते हैं, जिनका लक्षण भी स्वल्प ही होता जो स्वल्प कष्टदायक होते हैं, जिनका भेद भी स्वल्प होता है तथा स्वल्प उपक्रम से जो हैं, उनको **क्षुद्र रोग** कहा जाता है। पर यहां अधिक कष्टदायक और प्राणनाशक अग्नि**णी** आदि का तथा अधिक भेद वाले **विस्फोट और मसूरिका** का भी पाठ है। अतः प रिक क्रम से आयी हुई इस क्षुद्ररोग संज्ञा को रूढि संज्ञा ही समझना चाहिये। अन्य ग्र कारों ने विस्फोट और मसूरिका का स्वतन्त्र पाठ किया है, पर **शार्ङ्गधरजी** ने इनको रोग में ही दे दिया है। इस समग्र अध्याय की आलोचना से यही जँचता है कि शा **आचार्य** ने रोगों की गणना एक अपने ही नये ढङ्ग से किया है। अस्तु इनके लक्षण यार्थ संक्षेप में कहते हैं।

(१)**शर्करार्बुद**—यह किसी कदर अर्बुद जैसा होता है, उसमें वायु मांस को सुख कठिन रवा सा बना देता है जिसके निकलने से सिरा से सहसा दुर्गन्ध क्लेदयुक्त अ वर्ण का रक्तस्राव होता है। इसे **शर्करार्बुद** कहते हैं। (२)**इन्द्रवृद्धा** (इन्द्रविद्धा एक वातपित्तज पिडका विशेष है जिसके मध्य में पद्मपुष्करवत् अनेक पिडकाएँ होत (३)**पनिसका**—यह वातकफजनित पनस सी पिडका है जो कान के स्रोत में अ वाली होती है। (४)**विवृता**-यह भी एक प्रकार की पिडका है, इसमें पित्तका प्राबल्य हो यह चौड़े मुख वाली, भयंकर दाहयुक्त, पके गूलर सी लाल तथा गोल होती है। मुख होने से **विवृता** नाम है। (५)**अन्त्रालजी (अन्धालजी)**-कफवातज अल्प पूय और

---

(१) शर्करार्बुदलक्षणम्— **दुर्गन्धि क्लिन्नमत्यर्थं नानावर्णं ततः शिराः।**
सृजन्ति सहसा रक्तं तं विद्याच्छर्करार्बुदम्॥

अन्यलक्षणम्—**प्राप्य मांसशिरास्नायु श्लेष्मा मेदस्तथाऽनिलः।**
ग्रन्थिं कुर्वन्त्यसौ भिन्नो मधुसर्पिर्वसानिभम्॥
स्रवत्यास्रावमनिलस्तत्र वृद्धिं गतः पुनः। मांसं विशोष्य ग्रथितां शर्करां जनयेत्

(२) इन्द्रवृद्धालक्षणम्—**पद्मकर्णिकवन्मध्ये पिडिकाभिः समाचिताम्।**
इन्द्रवृद्धां तु तां विद्याद् वातपित्तोत्थितां भिषक्॥

(३) पनसिकालक्षणम्—**कर्णस्याभ्यन्तरे जातां पिडिकामुग्रवेदनाम्।**
स्थिरां पनसिकां तां तु विद्याद् वातकफोत्थिताम्॥

(४) विवृतालक्षणम्—**विवृतास्यां महादाहां पक्वोदुम्बरसन्निभाम्।**
विवृतामिति तां विद्यात्पित्तोत्थां परिमण्डलाम्॥

(५) अन्त्रालजीलक्षणम्— **घनामवक्त्रां पिडिकामुन्नतां परिमण्डलाम्।**
अन्त्रालजीमल्पपूयां तां विद्यात्कफवातजाम्॥

कण्डु वाली, कच्चे गूलर जैसी मुखहीन पिडका को कहते हैं। (१)**वराहदंष्ट्रा—**यह दाहकारी रक्त तक व्यापी, ज्वरकारी, कण्डुर और तीव्र वेदनायुक्त वराह–दाढ़ जैसा लम्बा शोथ है, जो पक जाता है। यह वङ्क्षण–संधि के नीचे दोनों में होता है। (२)**वल्मीक-**यह ग्रीवा, स्कन्ध, मन्या, कक्षा, हाथ, पांव अथवा संधिस्थल में होताहै। इसमें विमवट जैसी ऊँची पिडिकाएँ एक दूसरे पर होती हैं। उपेक्षा से पककर हर एक शिखर से स्राव होता है तथा तोदवत् पीड़ा होती रहती है। यह विसर्प जैसा फैलता भी है। यह गूढमूल होता है और पुराना होने से असाध्य हो जाता है। (३)**कच्छपी–**इसमें कफवात से कछुए जैसी मध्यमें ऊँची पांच छः पिडकाएँ एकत्र निकल आती हैं। (४)**तिलकालक–**वायु प्रेरित पित्त द्वारा शरीर में **अवभासिनी** त्वक् के नीचे कफ और रक्त के दग्ध हो जाने से काले या नीले तिल से चिह्न बन जाते हैं। इसे साधारण में **तिल** कहते हैं। (५)**गर्दभी—**वातपित्त–कर्तृक रक्तज पिडका है। यह मण्डलाकार गोल, उठी हुई तथा पिडकाओं से व्याप्त रुजा करने वाली होती है। (६) **रकसा—**शरीर में जो पिडिका स्रावरहित तथा कण्डू (खुजली) से युक्त होती है उसे **रकसा** कहते हैं। यह यद्यपि अन्यत्र कुष्ठभेदों में वर्णित है। तथापि क्षुद्र होने से यहां पर इस का वर्णन किया गया है। (७)**यवप्रख्या–**वातशोषित कफयुक्त मांस से उत्पन्न यवाकार, कठिन, क्षुद्र ग्रन्थि सी होती है।

अन्धालजीलक्षणम्—**कफानिलौ श्रितौ स्नायुं पिडिकां परिमण्डलाम् ।**
दुष्टौ जनयतश्चैकामल्पपूयाल्पकण्डुराम् ॥
आमोदुम्बरसङ्काशां विद्यादन्धालजीं तु ताम् ॥

(१) वराहदंष्ट्रलक्षणम्–**सदाहो रक्तपर्यन्तस्त्वपाको तीव्रवेदनः ।**
कण्डूमाज् ज्वरकारी च स स्याच्छूकरदंष्ट्रकः ॥

(२) वल्मीकलक्षणम्–**ग्रीवांऽसकक्षाकरपाददेशे सन्धौ गले वा त्रिभिरेव दोषैः ।**
ग्रन्थिः स वल्मीकवदक्रियाणां जातः क्रमेणैव गतः प्रवृद्धिम् ॥
मुखैरनेकैः स्रुतितोदवद्भिर्विसर्पवत्सर्पति चोन्नताग्रैः ।
वल्मीकमाहुर्भिषजो विकारं निष्प्रत्यनीकं चिरजं विशेषात् ॥

(३) कच्छपीलक्षणम्—**ग्रन्थयः पञ्च वा षड् वा दारुणाः कच्छपोन्नताः ।**
कफानिलाभ्यां पिडिका ज्ञेया कच्छपिका बुधैः ॥

(४) तिलकालकलक्षणम्— **कृष्णानि तिलमात्राणि नीरुजानि समानि च ।**
वातपित्तकफोद्रेकात्तान् विद्यात्तिलकालकान् ॥

(५) गर्दभिकालक्षणम्–**मण्डलं वृत्तमुत्सन्नं सरक्तं पिडिकाचितम् ।**
रुजाकरीं गर्दभिकां तां विद्याद्वातपित्तजाम् ॥

(६) रकसालक्षणम्—**कण्डून्विता या पिडिका शरीरे संस्रावहीना रकसोच्यते सा ।**

(७) यवप्रख्यालक्षणम्–**यवाकारा तु कठिना ग्रथिता मांससंश्रिता ।**
पिडिका श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते ॥

(१)**विदारिका**-सन्निपात-जनित, रक्त, विदारीकन्दवत् गोल पिडका जो कक्षासंधि और वङ्क्षण संधि में होती है। (२)**कदर**—कंकर या काँटे के क्षत से पांव के तलुए में गोल कठिन ग्रन्थि बन जाती है। (३)**मषक**—वातकर्तृक माष जैसा चर्म के ऊपर उठा हुआ प्रसिद्ध क्षुद्र रोग होता है। (४)**नीलिका**—जिस स्थल में चमड़े का रङ्ग नीला हो जाता है। यह विशेष कर मुख पर होता है। (५)**जालगर्दभ**—पित्तज, दाह और ज्वर करने वाला, न पकने वाला शोथ जो विसर्प सदृश फैलता है। (६)**इरिवेल्लिका**—शिरोभाग में होने वाली, तीव्रवेदना वाली ज्वरकारिणी, त्रिदोषज पिडका जिसमें तीनों दोषों के लक्षण प्रकट हों। (७)**जतुमणि**—ईषदुत्सन्न, वेदनाहीन, ताम्रकृष्ण सा कफरक्तज मण्डल जो गर्भ से ही विद्यमान हो। (८)**गुदभ्रंश**—रूक्ष और दुर्बल शरीर मनुष्य के अधिक अतिसार से या काँखने से गुदा बाहर निकल आती है। (९)**अग्निरोहिणी**—पित्त और रक्त से कक्षा भाग में उत्पन्न, ...

---

(१) विदारिकालक्षणम्—**विदारीकन्दवद् वृत्ता कक्षावङ्क्षणसन्धिषु।**
विदारिका भवेद्रक्ता सर्वजा सर्वलक्षणा॥

(२) कदरलक्षणम्—**शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः।**
ग्रन्थिः कोलवदुत्सन्नो जायते कदरं हि तत्॥

हस्तयोः पादयोश्चापि गम्भीरानुगतं खरम्। मांसकीलं जनयतः कुपितौ कफमारुतौ।
सशल्यमिव तं देशं मन्यते तेन पीडितः। शर्कराकदरं केचिन्मन्यन्ते वातश्लेष्मजम्॥

(३) मषकलक्षणम्—**अवेदनं स्थिरं चैव यस्मिन् गात्रे प्रदृश्यते।**
माषवत्कृष्णमुत्सन्नमनिलान्मषकं तु तत्॥

(४) नीलिकालक्षणम्—**कृष्णमेव त्वचं गात्रे नीलिकां तां विनिर्दिशेत्।**

(५) जालगर्दभलक्षणम्—**विसर्पवत्सर्पति यः शोथस्तनुरपाकवान्।**
दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्दभः॥

(६) इरिवेल्लिकालक्षणम्— **पिडिकामुत्तमाङ्गस्थां वृत्तामुग्ररुजाज्वराम्।**
सर्वात्मिकां सर्वलिङ्गां जानीयादिरिवेल्लिकाम्॥

(७) जतुमणिलक्षणम्—**सममुत्सन्नमरुजं मण्डलं कफरक्तजम्।**
सहजं लक्ष्म चैकेषां लक्ष्यो जतुमणिस्तु सः॥

(८) गुदभ्रंशलक्षणम्—**प्रवाहणातिसाराभ्यां निर्गच्छति गुदो बहिः।**
रूक्षदुर्बलदेहस्य गुदभ्रंशं तमादिशेत्॥

(९) अग्निरोहिणीलक्षणम्—**कक्षभागेषु ये स्फोटा जायन्ते मांसदारणाः।**
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः॥
सप्ताहाद्वा दशाहाद्वा पक्षाद्वा हन्ति मानवम्।
तामग्निरोहिणीं विद्यादसाध्यां सर्वदोषजाम्॥

